IndL
2800
608A

The Yôgâmritataranginî 1904

Digitized by Google

Ind L 2800.608A




Harvard College
Library

THE BEQUEST OF

Charles R. Lanman

PROFESSOR OF SANSKRIT
1880–1926



Digitized by Google

THE

YÔGÂMṚITATARANGIṆÎ

OF

SRÎ-NÎLAKAṆṬATÎRTHA.

श्रीनीलकण्ठतीर्थकृता

योगामृततरङ्गिणी ।

मुंबय्यां


निर्णयसागरमुद्रणयन्त्रालये मुद्रापिता ।

Digitized by Google

"सदानंदयतीन्द्रांघ्रिसरोज इदमर्पितम् ।
मङ्गलानन्ददेव्या तच्छिष्टयाऽधिकभक्तितः ॥"

Digitized by Google

Digitized by Google



श्रीनीळकण्ठतीर्थ.

Digitized by Google

THE

YÔGÂMṚITATARANGIṆÎ

OF

SRÎ-NÎLAKAṆṬATÎRTHA.

EDITED BY

PANDITAVAR KRISHNA SHASTRI.

PUBLISHED BY

SRÎ MANGAḶÂNANDA DEVÎ.

PRINTED AT JAVAJI DADAJI'S "NIRNAYA-SAGAR" PRESS.

1904.

Digitized by Google

IndL 2800.60
A
HARVARD COLLEGE LIBRARY
FROM THE ESTATE OF
CHARLES [illegible]
MARCH 15, 1941

F

Digitized by Google

श्रीनीलकण्ठतीर्थकृता

योगामृततरङ्गिणी ।



इदं पुस्तकं

विद्वन्मूर्धन्य० परवूर्० वि० कृष्णशास्त्रिद्वारा

संशोध्य

श्रीमत्सदानन्दस्वामिपादालब्धनिष्ठाकया तथा एत-

ग्रन्थकर्तुः सकाशादधिगतात्मविद्याकया

श्रीमंगलानंददेव्या

मुंबय्यां

निर्णयसागरमुद्रणयन्त्रालये मुद्रापिता ।

खीस्ताब्दाः १९०४.

Digitized by Google

योगामृततरङ्गिण्यनुक्रमणिका



१–हरिभजनामृतम्–

२–विधुनवसुधाझरी–

३–हरिपञ्चकम्.

४–विधुस्तवमधुद्रवः–

५–स्वात्मसुधाकरः–

६–योगमञ्जरी–

७–अमृतलता.

८–कालीपञ्चकम्.

९–घण्टाकर्णपञ्चकम्.

१०–आ० पा० सप्तकम्–

---

१ योगशब्देन "भक्तिज्ञानयोगाः" संगृह्यन्ते.

Digitized by Google

श्रीहरिभजनामृतम् ।

श्रीहरिः सर्वम् ॥ ओम् ॥ श्रीमन्नारायणपदतलद्वन्द्वमद्वन्द्वकन्दं सर्वोत्कृष्टं खन मतिवराहात्मना चानुभुङ्क्ष्व । एवंकारे भवसि हि सुखी नित्यतृप्तस्त्वमीतो[1] यत्नाद्याच्ञां सफलय ततः पूर्णकामोऽप्यहं स्याम् ॥ १ ॥ तूष्णीं[2]भावं विभुपदमितो वर्तितुं मार[3]सोतर्वष्टि[4]येषो-ऽङ्गालिकनयनसेव्याव विष्णो तदेनम् । त्वद्धामैत्यैति न पुनरतो देहमित्यूचिषे यद्गीतायां वज्र[5]युपलसुभगंभावुकाभोग[6]भोग ॥ २ ॥ साक्षाद्द्रष्टा त्वमिति सकलस्यापि साक्षीति वित्तः[7] सत्येवं सज्जनर्गणि-मिहेड्भो कृथा मा वृथाज । मामुद्धर्तुं प्रतिनवसुधाह्लादिनेत्राञ्जलेन त्वं जन्मान्धो[8]र्यसैकरुणया त्वां प्रपद्ये तदेकम् ॥ ३ ॥ श्रीकृष्णस्मृत्य-पचितिकृते चूर्ण[9]पेषं पिनष्टि स्वाच्छन्द्येनाशयकथितबीजं कृती यः स एषः । इत्यालोच्य प्रकृतजननोपक्रमं सेव्यते यो दूर्वाकाण्डप्रति-निधिरुचिर्मां स्वभू रक्षतात्सः ॥ ४ ॥ मायामात्रं तव वपुरिति ज्ञायते गोपते यत्तन्नाकृष्टं भवतु भगवद्विष्ण्यतो दर्शयान्यत् । अन्वर्थं कुर्व-ज निरुपमं नाम मायीति पश्चात्कार्यं जाने वचनविरतं युज्यते लिप्सितं यत् ॥ ५ ॥ ब्रह्मीभूय त्वयि तनुलये ज्ञानवान्निर्विभागे संविद्रूपे सपदि विलयं याति कैवल्यकन्द । विष्णोरैक्यं त्वज[10] नि-धिनिधायं निदध्य स्थितोऽयं यत्तद्रक्ष प्रणतहृदयाकूतकल्पद्रुकल्प ॥६॥ पौर[11]म्यं ते निबिडसहजानन्दसन्दोहदायिन्साक्षात्कर्तुं खननमु-दितं यत्त्वयाऽगाधबोध । उत्खातुं हृद्भुवमयमपास्योपलं देहसंज्ञं

---

१ ईतो=गतः ॥ इण्–गतौ ॥ २ तूष्णींभूय ॥ ३ मारसोतः=कामजनक । षु–प्रसवैश्वर्ययोरित्यस्मात्तृच् ॥ ४ आशास्तेऽर्थयते वष्टि । इति भट्टमल्लः ॥ ५ वज्र्युपलः=इन्द्रनीलमणिः ॥ ६ भोगः=शरीरम् ॥ ७ ज्ञातः ॥ ८ गर्णि= गणनम् ॥ ९ इट्=ईश ॥ १० यसु–प्रयत्ने ॥ ११ चूर्णवत्पिनष्टि, शुष्कचूर्णेत्यादिना पिषेर्णमुल् ॥ १२ निधिवन्निधाय (निधि निधायम्) ॥ १३ परमत्वं, श्रेष्ठ्यम् ॥

Digitized by Google

धीकुहालैर्यसति तदिमं धारय स्वे महिम्नि ॥ ७ ॥ उद्बुद्धेश्वर्युपकृति-दलचक्रजालेषु विष्णुं कृत्वा मूलादिषु विधुसुधाधोरणीदिग्धगात्रम् । सन्दध्यां त्वां मयि कुरु कृपां तत्सुरद्विड्विकाषिन्भूयात्प्रत्यक्षितहरिपदोऽयं त्विय्यत्तावहीन ॥ ८ ॥ सामञ्जस्यं भजति नहि ते भेददृष्ट्यादृशेषु त्वन्नाथेषु स्फुरणसुखमात्रात्मक श्रीनिवास । इत्यस्मान्मां प्रबलकरुणाधिष्ठितः सन्प्रपायाः प्रह्लादं वा प्रकृतिमृदुलं त्वल्पदं धारयेयम् ॥ ९ ॥ श्रीमद्विष्णोरमलचरितान्येव सेवेत नान्ध्याद्यावत्तावत्सुखमपमृतसून्यत्र दुःखी य एषः । श्रुत्या युक्त्याऽप्यनुभवबलेनाच्युतं यत्सदाऽहं वेद्म्यात्मत्वेन तु करुणया मे क्रिया नित्यसौख्यम् ॥ १० ॥ कर्तुं मेऽनुग्रहमुपनिषन्मात्रगम्ये विभौ मन्नैजानन्दत्वत इह चिक्लृप्त्यहं तद्विवेक्तुम् । शक्तो न स्यामपि च भगवन्नो मया रुद्यते तत्काले तस्मादिममव सदानन्दसान्द्रस्वरूप ॥ ११ ॥ कार्याकार्यद्वयविनिमयं यद्बहुलाकरोस्त्वं भृत्यार्थे तत्तव करुणया ज्ञातमेतेन भूमन् । र्यस्यत्वस्मान्निजचरणदासं भवान्मोऽवितुं यत्सर्वेत्याद्यां शरणमयते त्वद्गिरां सर्वथाऽयम् ॥ १२ ॥ भक्त्या यद्यत्कृतमभिहितं तत्तदिष्टयै तवेति स्तौमि त्वां नो चरित इह संनह्यते बालिशेन । जायन्तेयादिकमुनिगिरा बुध्यतेऽशक्यताऽत्र श्रीवैकुण्ठेश्वर दनुजहन्मे प्रसीद प्रसीद ॥ १३ ॥ चित्ताम्भोजे मम चिरमटाव्यां कुरुष्वाच्युत त्वं का हानिस्तत्कठिनमिति किं गोपिकानां वै नास्य । योगाभ्यासादपि तु मसृणं पश्य पश्यात्मयोने नत्वाष्टाङ्गैः पृणति तदयं मा विलंबस्व लेशम् ॥ १४ ॥ कश्चित्स्निग्धाञ्जनगिरिसमं त्वां गृणातीह तद्वच्चन्द्राङ्कश्रीमुषमितर एकः कलायाभिरामम् । देव त्वाऽन्यः कवयति घनाभं

---

१ उद्बुद्धेश्वरी=प्रबुद्धशक्तिः ॥ २ परम्परा ॥ ३ अप्रमेय । (अपरिच्छेद्य) ॥ ४ वा=इव ॥ ५ स्वभावकोमलम् ॥ ६ अमृतं सुवत इत्यमृतसूनि । षुङ्–प्राणिगर्भविमोचने ॥ ७ परिणन्तु मिच्छति ॥ ८ यसु–प्रयत्ने ॥ ९ मा=माम् ॥ १० महिमगणने नह्यते । पा० ॥ ११ अटनम् ॥ १२ व= इव । वं प्रचेतसि जानीयादिवार्थे तु तदव्ययम् । इति कोशः ॥ १३ पृण–तर्पणे, अग्निं पृणाति पृणति द्विजदेवतांश्च । इति कविरहस्यम् ॥

Digitized by Google

परो नीलकंठग्रीवाप्रख्यं परमनुपमं सोऽयमीश प्रसीद ॥ १५ ॥ नीलग्रीवोपमितिकथनं मामकाख्याश्रुतौ ते ध्याकारः स्यान्मम विषयको नैलकंठाह्वगंधात्। इत्येव श्रीकमन न भवानन्यथा चिन्तयेन्मां यत्कल्याणात्मकपरशिवध्यानधिष्ण्यामलात्मन् ॥ १६ ॥ कैवल्याख्यां सुखकणकरालां समाप्यैष संस्थां नैर्चेन्द्रयः स्वभुवमयमित्यात्मनाथो भवान्किम्। तूष्णीमास्ते वदतु भगवांस्तन्निदानं चिकित्सां कुर्यां विष्णोः परकरुणया नो विलंबं सहेऽहम् ॥ १७ ॥ जाने शार्ङ्गिन्न खलु भवतोऽकिंपचानाशयं यज्ज्ञानेऽभीष्टां रचयितुमहो शक्नुयां कारिकां ते। अग्रे भूत्वा वद करुणया तत्कथञ्चिद्यतिष्ये भक्त्याऽहं सोऽनपरशरणो मे प्रसीद प्रसीद ॥ १८ ॥ भो भोः शौरे मम शिरसि सदृध्रुक् क्षिपाकार्मणं ते हस्तं कृत्वा शमय भगवन्हृद्रुजं त्वां प्रणौमि। भूयो भूयो नतिमपि किरञ्चैन्दवस्मेर विष्णो नातोऽन्यस्मै प्रभवति जडोऽभीष्टसन्तानशाखिन् ॥ १९ ॥ कोऽन्यो माऽवेद्विधुपदसरोजातनिष्यन्दमाध्वीगृध्यद्भृङ्गं वद वद हरे श्रेयमाहो ममैकम्। सर्वेशत्वक्षतिकरमिदं मा वचो वोच विष्णो किन्त्वेनं भोः प्रणतशरण त्वं प्रपाया मुकुन्द ॥ २० ॥ वार्चाराद्धुत्रिभुवनपतिर्मे क्षिंतस्यार्थं ईष्टे विष्णुं नान्यं कवत इह भो त्वत्स्मृतेस्संस्कृतायुः। तत्त्वं कूलंकषकरुणयाऽऽघूर्णितान्तर्गिरिः सन्कुर्या नोऽनुग्रहमजगतिस्त्वां विना कुत्रचिन्न ॥ २१ ॥ नैवात्मा च प्रिय इति भवान्यत्त्वभाणीत्स्वभृत्यं बार्हस्पत्यं स इव भगवंस्तन्मृषा वा न भक्तिः। किंवा मेऽस्य प्रविश हृदयं शोधयार्द्रं न चेत्तत्कारी रुंध्याऽस्त्वज तव तदानन्ददीप प्रसीद ॥ २२ ॥ देवः कृष्णायत इति नहि क्वापि कोऽपि स्वभृत्यप्रेमावेशात्स्वकमहिमसंप्रापणे यत्ततोऽहम्। लंभं लंभं रमतिजनकामोदमेनं

---

१ रमाकामुक ॥ २ सौख्यलवतुङ्गाम् ॥ ३ ऋच–स्तुतौ ॥ ४ अक्षुद्राभिप्रायम् ॥ ५ क्रियाम्। ण्वुल् ॥ ६ सदृद्रोहिक्षिपाकर्मठम्। (कार्मणः कर्मणि कुशल; अण्॥) ७ लुभ्यद्भ्रमरम् ॥ ८ वाक्॥ ब्रह्माणी वचनं वाचा। इति कोशः॥ ९ क्षीणस्य ॥ १० ईड–स्तुतौ, अदा० आ० प॥ ११ कारिः=क्रिया॥ १२ इष्टा॥ १३ लब्ध्वा लब्ध्वा॥ १४ रमतिः=कामः(औणादिकः)।

Digitized by Google

नुवंस्त्वां नामं नामं दिवसगमने बद्धबुद्धिर्भवामि ॥ २३ ॥ त्वद्बद्धात्माऽस्म्यजय भरिमासक्तिमुत्सार्य विष्णो न स्थेयान्मे मतिरिति सकृद्वस्तुयुग्मे मुरारे । कालोऽयं मां सुखयितुमिदानीं तवेहाद्वयात्मन्नौदास्यं चेद्भवति विफला गीत्युदीता प्रतिज्ञा ॥२४॥ हृन्मौठर्यं ननु रुजति मे त्वन्निविष्टं व्यथाख्यो हिंसीरस्तं जहि सुखय भो माऽतिदुर्लभरूप । वेलालंघिप्रतरलसुधांस्तिभिगंभीरिमाऽथो भूयादस्येत्यज विवरग त्वां विना कुत्रचिन्न ॥ २५ ॥ वैकुण्ठेक्षासुरभिरयथास्थित्यमानस्यतृण्यां तर्णोत्वस्य प्रदिशतु तथाऽऽनन्दसन्तानबन्धुम् । तत्ते सौख्यप्रसविपदयंयम्यमानान्तरंगो हे विष्णो त्वां निखिलजनहृत्साक्षिरूपं भजामि ॥ २६ ॥ विध्वंछ्युत्था सुरपुरझरीस्वर्वधूकेशवेशभ्रश्यन्मन्दारकसुरभिला विष्णुपत्प्रापिरज्जुः । जातेहत्यान्पवत इति यन्नात्र चित्रीयते तत्त्वन्माहात्म्यं गणनविषयं नेति हे स्वारतीड्य ॥ २७ ॥ लीलामूर्तिग्रहणमिह ते मादृशत्राणमेकं हेतूकृत्य प्रकृतमिति सन्निश्चयः किं न तद्वत् । ओङ्कारं वा श्रवणविषयीकुर्वथो नेति वाचं वन्देऽहं त्वां जननहर जञ्जन्यमानादरेण ॥ २८ ॥ भासन्तान्तःपुरुषमुपतिष्ठे हरिं दीप्रमुच्चैर्भानुर्यद्धयाय्युपगमविधौ राजमार्गायते हि । अस्मात्त्वत्प्रीत्युदयजनकं नास्ति यत्तन्मुरारे पूर्णानन्दं वितर भगवन्दासमेनं प्रपाहि ॥ २९ ॥ हस्तग्राहं चरणकमलं वैधवं मानसाख्ये कासारेऽस्य क्षिपतु भगवन्नष्टिराहो भवेत्का । तेनायं स्यात्परमसुकृती निश्चयेन त्रिधन्यस्तस्माद्याच्ञां मम सफलयन्देह्यनुज्ञां नमस्ते ॥३०॥ हरिः ॥ शिशुसंज्ञमुनीन्द्रपादपीठायितमूर्ध्नाऽसितकन्धरेण सूक्तम् । मुरभिद्भजनामृतं हृदन्तः कुरुते यः स समाप्तकाम उक्तः ॥ ३१॥

॥ इति हरिभजनामृतं समाप्तम् ॥

---

१ भरिमा=कुटुंबम् ॥ २ मनोमुनिम् । (गर्गादित्वान्माठर्यः)॥ ३ दुष्टः॥ ४ स्तिभिः=समुद्रः ॥ ५ अमानस्यं कृच्छ्रकष्टम् इति कोशः ॥ ६ तृणु–भक्षणे ॥ ७ कल्पोद्भवेति । पा० ॥ ८ भासन्तः सूर्यः ॥ ९ नष्टिर्नाशः ॥

Digitized by Google

अथ विधुनवसुधाझरीप्रारभ्यते ।

हरिः ॥ कल्याणं वितरतु शौरिवाङ्मृदीष्णायैतस्मै प्रणतभवार्दनो हयास्यः । यत्प्रीत्याऽपर इव गीष्पतिर्भवेत्सोऽप्येकान्तेन हि लघु किम्पचानवाग्यः ॥ १ ॥ स्वत्वेनाच्युतमनुभूय मुक्तिसौधं त्वारोढुं मम चपलाधवांघ्रिसेवा । निःश्रेणीभवतु सदेति कामितास्मिन्कल्पांघ्रिपमजमन्वहं प्रपद्ये ॥ २ ॥ सिष्णासुर्विधुकरुणामृतोदराशावस्म्यङ्ग स्वजनभियाऽद्रिभिद्रूप । यद्विष्णो भर्यरणिसमुत्थदुःसहार्चिर्निस्तप्तः स्वयमपि नित्यभक्त एषः ॥ ३ ॥ संभूतं मधुमथनास्य दुःखपङ्कं नासाद्वार्द्धयँसमिवाशु पाह्यतो माम् । नो याप्योऽमृतकरुणैष काल ऐदम्पर्यं यद्भवतु न तद्वचोऽतिभूस्थ ॥ ४ ॥ विष्णो त्वद्विहरणयोग्यमास्तृणीय स्वान्तांभोरुहि तलिमं ममैष वृत्या । भोगीन्द्रप्रतिकृतिकं विधित्सुरन्तः स्थित्वा मामवतु भवात्रतीशसोतः ॥ ५ ॥ आपीयाच्युत तव कीर्तनानि साक्षादैकात्म्यप्रसविसमाधिवारिसुन्ति । अस्यान्तःकरणसमाख्यचातको मे नो मांक्षेद्विषयविषांब्वतोऽव माऽज ॥ ६ ॥ शार्ङ्गिंस्तेऽक्षयकरुणाकटाक्षधारा स्वर्णद्या मयि सहपाठवीथिमेतु । श्रीकंठाह्वय इति चैष तत्कृतेऽहं विध्वर्हौ दध उरुगीत ते समर्चाम् ॥ ७ ॥ शोणांभोरुहसखमक्षि तेऽज भूयात्कारुण्याभिधमकरन्दबिन्दुसान्द्रम् । यत्स्वादे हृदयमधुव्रतो मदीयो विष्णो स्थास्नवनुभविता सुखं सदैव ॥ ८ ॥ स्वेक्षाऽऽयलककृशितान्तरङ्ग एष त्वां सेवेऽच्युत करुणातरङ्गिताक्षम् । तद्देवोद्धर पर मानसैणशावं बाधान्धोर्मम नवमेघगोत्रगात्र ॥ ९ ॥ वैदेहीहृदयरुहप्रलीनकालेयारक्तोरसि तव नादधा गुहं

---

१ क्षुद्रगिरा ॥ २ चपला कमला लक्ष्मीरिति विश्वः ॥ ३ प्राग्रूपं विधुमहमन्वहमिति पा० ॥ ४ भयं भियेति शब्दार्णवः ॥ ५ भिद्रं वज्रम् ॥ ६ अरणिः=सूर्यः ॥ ७ परिमाणे द्वयसच् ॥ ८ विस्तारयेयम् ॥ ९ तलिमं कुट्टिमे तत्प इति र० मा० ॥ १० माक्षि—काङ्क्षायाम् ॥ ११ आहारो भोजनं स्वाद इति हलायुधः ॥ १२ आयलकमुत्कण्ठा । इति यादवः ॥ १३ हृदयं चित्तवक्षसोरिति कोशः ॥

Digitized by Google

किम् । कारुण्यात्तदिति न च प्रयोजनार्थं शङ्के तत्कुरु कृपयेममेवमेव ॥ १० ॥ चिन्मुद्राविवृतनिजस्वभावदार्ढ्यं कर्तुं मां भवतु कृपार्द्रदृष्टिपातः । श्रीश त्वां शमथधनांतरञ्जशृंगं सौषुम्ने पथि विधिवत्समर्हयामि ॥ ११ ॥ श्रीशेक्षार्बुदतयजानुकूल्यवार्वृष्टर्थो-बाधाकषितकषायितान्तरंगम् । संस्कर्तुं जनिहर सैष तत्प्रसन्नस्त्वं विष्णो वितर तवानतिं दधाति ॥ १२ ॥ उद्यत्कोट्यरुणरुचिच्छटं किरीटं माणिक्याकरपरिपन्थिनं स्मरामि । हृद्यन्तर्नरकविनाशनस्य विष्णोः सङ्कीर्णालकमलिकं च सर्वकालम् ॥ १३ ॥ भ्रूयुग्मं मदनशरासनप्रतीपं चाकोराक्ष्यरुणिमदायिनेत्रशोभि । कुर्वेऽन्तस्तिलसुमगर्वचर्विनेस्यां चैवं संसृतिदवदावरूप विष्णो ॥ १४ ॥ चित्ताब्जे मम मधुमत्प्रवालशोभौलुण्टाकाधर उदितः सदा चकास्तु । तद्गण्डोपलमुकुरप्रविष्टकर्णोत्तंसश्रीमकरमहामणिद्वयं च ॥ १५ ॥ वैकुण्ठेशय तव यस्मितस्य साक्षादैत्कौमुद्वतसितिमेव पूर्वकोटिम् । एषोऽहं परिकलयामि हास्यमेनत्तन्मन्दारकगुणकारि सर्वदैवम् ॥ १६ ॥ सत्कण्ठोदित तव कण्ठलग्नमालां धत्तेऽयं हृदि सँपतीयते श्रियो या । विष्णो कुँस्तुभभवमण्युदारवत्सं श्रीवत्सेन च सह नित्यसौख्यवृत्यै ॥ १७ ॥ दौर्भाग्यासुरकभुजिक्रियाचणांस्ते वज्रोग्रान्मम मनसा करान्स्मरामि । हे विष्णो प्रलयदिनेशदीप्रचक्राब्जाम्भोजोद्भटगदिकाधरान्मुरारे ॥ १८ ॥ याह्यन्तर्भ्रमर मुकुन्दनाभिपद्मं यन्माध्वीं रिरसयिषत्यहो अजाली । तत्पीतांबरभवमेव तत्र तेजः सान्ध्यं नाण्वपि विहरान्वहं यथेच्छम् ॥ १९ ॥ ऊरुं ते मुरहर हस्तिशावहस्ताग्राकर्णेजपमनुसन्दधामि विष्णो । कैवल्यप्रद परिभूतकूर्मराजं चेत्थं ते प्रपदमजाव मां कृपातः ॥ २० ॥ सन्तानप्रतिनवपल्लवाभिरामं विन्यस्याच्युत तव पादमस्य मूर्ध्नि । सन्तापं शमय कृपामृतं विकीर्य त्वामीशं शरणमितो व्रजामि चैकम् ॥ २१ ॥ स्निग्धेन्द्रोपलमधुरं स्वरूपमेकं हृद्यन्तः स्फुरतु

---

१ आबाधा वेदना दुःखमिति कोशः ॥ २ नसा नस्या च नासिका । इति कोशः ॥ ३ लुण्टाकश्चौरः ॥ ४ सपत्नीवाचरति ॥ ५ कुस्तुभः समुद्रः ॥

Digitized by Google

सदैव कैशवं[1] मे । आख्यंभावुकपदमेतु निर्विशंकं येनेदं मम मन ऐषमोऽब्धिशायिन् ॥ २२ ॥ कारुण्यात्तव भवदावपावकस्त्वद्भृत्ये-ष्वीण्मलयजपङ्कतीति बुध्या । तैत्तामेत्यतिलघु सोऽयमित्यहं त्वां भोः स्वामिन्रैणरणकाशयः[3] प्रणौमि ॥ २३ ॥ यम्यन्तःकरणग सौ-ख्येसुप्तिकः[4] स्या न्नैश्चित्वाऽसदृशनचंपचाऽमनस्यम्[5] । सारल्यान्मम मधुसूदनैतदर्थं त्वामर्हाम्युपनिषदैककण्ठ्यगीत ॥ २४ ॥ भिद्यो-द्यप्रतिनिधि मय्यनन्त भूयात्कारुण्यं निगमशिरोरसप्रतिष्ठ। भक्ता-न्तःकरणचकोरिचञ्चुकोट्यां[8] भद्रश्रीमँसृणरसीयतीश भो यत् ॥ २५ ॥ हे मांसप्रमितसुधामयूखलेखालोभ्यात्मन्विश मम दृक्सृतिं[9] मुकुन्द । चिद्योऽयच्युत गेहनंसदीशसूनुं[10] त्वां सोमामृ-तपरिषिक्तगात्रमीडे ॥ २६ ॥ निर्गत्वा चटचडितीश दृक्कुटंगा-त्पातङ्गी[11] रुचिरज ते कृपाऽन्धकारम् । मोहाख्यं मम कवलीकरोतु विष्णो त्वां वाचंयमयमिवन्दथं प्रपद्ये ॥ २७ ॥ विष्णोस्तेऽकु-टिलकटाक्षकामधेनोः पूर्णानुग्रहमयमेव मे प्रदाय । औधस्यं[13] मम पैरिबृंहितायतीस्त्वं हे स्वामिन्कुरु सुखसन्ततीः प्रकामम्॥ २८ ॥ कारुण्यात्सममतिशेष इत्ययं मे हृत्पुंष्पधय इत ईश तेऽङ्घ्रि-पद्मम् । तैर्द्धर्मं[14] कुरु भगवन्विचारकृत्यामस्पृष्ट्वाऽमृतपिबचि-त्तचन्द्र विष्णो ॥ २९ ॥ त्वं तत्पायितभुजगेन्द्र पाहि मान्तर्ने-स्तांधंकरणदराभिधानधूलिम् । धून्वंस्त्वाऽमृततटिनीं वगाह्य[15] प-श्चादहीं ते मुरहर निर्भिदं करिष्ये ॥ ३० ॥ हरिः ॥ श्रीबालना-मभगवच्चरणारुणाब्जहंसायितासितगलाभिधनिर्मितां यः । विष्णुः

---

१ केशवस्येदं कैशवम् ॥ २ तस्य भावस्तत्ता ॥ ३ रणरणकमुत्कण्ठा ॥ ४ सुखसुप्तिं पृच्छतीति तथा ॥ ५ छित्वा ॥ ६ ङ्यापोरित्यादिना ह्रस्वः ॥ ७ घुसृणेति पा० ॥ ८ मासं प्रमितो (मासप्रमितः) ॥ ९ दृक्पथम् ॥ १० देवराजानुजम् । सूनुः पुत्रेऽनुजे । इति विश्वः ॥ ११ लतागृहात् ॥ १२ (ऊधसि भवम्) पयः ॥ १३ प्रचितोत्तरकालाः (स्थिराः) इति घण्टापथः ॥ १४ भरणे पोषणे भर्म इति हैमः ॥ १५ वष्टि भागुरि-रल्लोपमवाप्योरुपसर्गयोः ॥

Digitized by Google

स्तवामृतझरीं कुरुते हृदन्तः सम्पूर्णकाम इह चैष मृतौ विभुस्यात् ॥ ३१ ॥

इति विधुनवसुधाझरी समाप्ता ।

अथ श्रीहरिपञ्चकम् ।

ओं तत्सत् ॥ आमोदामृतवार्धिवीचिपृषतक्लिन्नं करोत्वन्तरं कर्णाकर्णिकयोपवर्णितपरात्मैक्यप्रतिष्ठस्य मे । योगोदस्रपितात्मदर्पणतले तेजो दरीदृश्यते यद्विष्णोः स रमेरितस्मितसुधासारावसेकेक्षणः ॥ १ ॥ मान्तर्मारसमाख्यबीजगमितस्याचार्यकं योऽदधिष्टैष त्वं शतकोटिशारदशशांकामेक्षण श्रीपते ॥ पिंषैन्हृद्रसंज्वरं दिश शमेनं दैन्दहीतीव यः कादाचित्कतया मुकुन्दपदकञ्जेन्दिन्दिरीभूतमीट् ॥ २ ॥ दुःसाधं मधुभिद्रुणानुगणनं यद्यप्यहं स्तौमि तं वाँचालीकुरुते तदीयचरणश्रद्धापिशाचीति माम् । तस्मान्मेऽनुजिघृक्षयैव भवता भाव्यं मुरारेऽन्वहं नौदासीन्यवशंवदो भव कदाऽप्यद्वैतविद्याश्रय ॥ ३ ॥ मह्यं द्रुह्यति यस्त्वमुं सुखय इत्येतत्किमाचार्यकं तत्त्वं विस्मर भक्तरक्तिमबलाच्छंभोः संतीर्थ्यीकुरु । स्वं वर्तस्व ममानुकूल्यविधिना कारुण्यरिञ्छोलितः सत्क्षेपः सुशको न मेऽथ भगवन्रोरुच्यते वा न यत् ॥ ४ ॥ विष्णोऽन्तर्हरिणी ममास्रँखुरलीकृत्सा व्यथाव्याधतस्तन्मां रक्ष समामराश्रुतचरं सौख्यं नियच्छंस्तु मे । शिष्टानुग्रहविष्टरस्थितमहं त्वां मे भ्रुवोरन्तरुज्ज्योतिर्दीपदृशिक्रियैकविषयं कुर्यां कृपाधूर्वह ॥ ५ ॥ शिश्वर्थनामकयमीन्द्रपदाब्जभृंगश्रीनीलकण्ठरचितं हरिपञ्चकं यः । संस्मृत्य विष्णुमखिलेश्वरमेव चित्ते भक्त्या पठेत्स भवितात्र समाप्तकामः ॥ ६ ॥

समाप्तमिदं हरिपञ्चकम् ॥

---

१ गमनस्य ॥ २ चूर्णयन् ॥ ३ अतिशयेन दहति ॥ ४ मुखरयति ॥ ५ सतीर्थ्यो भव त्वमिति पा० ॥ ६ रिञ्छोलिः स्रीततिश्छटेति कोशः ॥ ७ अभ्यासस्थानम् ॥

Digitized by Google

अथ विधुस्तवमधुद्रवः प्रारभ्यते ।

हरिः । हरिचरणसरोजचञ्चरीकान्तरंनिबिरीसतमो विधूय पायाः । प्रैंचिकटयिषुरेष संस्तवीति स्वभुवमिहोदितभक्तिमित्यजैनम् ॥ १ ॥ धरतु विधुरतिप्रकाशमन्तःकरणजैलेरुहि चेन्दिरापतीनः । नमदमरकिरीटरत्नदीपद्युतितपदाङ्कपरंपरः सदा मे ॥ २ ॥ नहि विदितमिदं कदा मदाधिं हरसि पुरीतदधीतसंस्तवस्त्वम् । अपि मतिबलतः करोमि तेऽर्हां मुरहर मा मयि भूरुदास्तवृत्तिः ॥ ३ ॥ मनुभुवननिवासिसम्मता शंकरमुखशङ्करता तवादिदेव । तदपि बत भवानिवार्ति आस्ते मम सुखने किमितीश नैव जाने ॥ ४ ॥ क्षतिरज भविता नु कैतदीयावनत इतीश बुभुत्सयाऽनुयोगम् । विधिनत विधिवत्प्रणम्य कुर्वे वद वद कालविलंबवर्जमेतत् ॥ ५ ॥ शरणमितमजं समात्मना चेद्रुजति दरोंऽभसि बंभ्रमीति चाश्मा । स्थित इति नरकस्य जिष्णुरन्तर्ज्वरहरणाय नहीहसे कुतो मे ॥६॥ तव पदतलयोर्लुठन्तमित्थं सहजकृपाभरलोलितान्तरस्वम् । रुदथमिममवाखिलैकतात स्वरिततरं दैवयंस्तु चित्ततापम् ॥ ७ ॥ मुरमथनमितो व्रजाम्यहं गोतमगृहिणी मुनिरुट्शिलीकृताऽपि । तदुपरिकृतयत्पदाब्जपांसुस्तुतिबलतः स्त्रैतरा बभूव सद्यः ॥ ८ ॥

हरिः ॥ एतद्यस्मात्स्वमसदक्षं जगदुत्थं संविद्रूपे संप्रति यस्मिन्स्थितिमेति । रज्जावध्यारोपितनेत्रश्रुतिवच्च लीयेतान्ते यत्र तमन्तः कलयेऽजम् ॥ १ ॥ श्रीकृष्णांघ्रिद्वंद्वसरोजे मधुधाराऽस्त्यन्तर्भृंग त्वं पिब नित्यं यतवृत्तिः । इत्थंकारं यापय कंचित्समयं वा ताद्रूप्यान्मां पातु यथाऽजस्त्वयि लीने ॥ २ ॥ वारंवारं विष्णुमुदारं हृदयान्तर्धारंधारं तत्पदमेष्यत्यथमेवम् । धीध्वस्तान्यालोचन आस्ते यदज त्वं धेया धूस्तम्भं तदमुष्यावनरूपम् ॥ ३ ॥ ब्रूहि त्वं माऽनन्यगतिं चेन्नहि रक्षेर्भो अन्योऽमुं कोऽवतु विश्वा-

---

१ निबिरीसं दृढं गाढमिति कोशः ॥ २ प्रकटयितुमिच्छुः ॥ ३ सरोरुह इन्दिरेति पा० ॥ ४ अभ्यस्तपरिचयः ॥ ५ अवशः ॥ ६ उत्सारयन्दूरीकुर्वन् ॥ ७ स्त्रीतरा ॥ ८ नेत्रश्रुतिश्चक्षुःश्रवाः ॥

Digitized by Google

श्रय विष्णो । पूजां सम्यग्देव यथाशक्ति विधातुं कुर्वे यत्नं तद्वि-मुखो मा भव किंचित् ॥ ४ ॥ विश्वस्मिन्कस्त्वत्त उदारः करु-णाब्धे कर्तुं दीनानुग्रहमेकः परमास्ते । स्थित्वाऽन्तः संशास्ति सदा नो य इहायं वा तं त्वां वेद्मयच्युत तन्मामव नित्यम् ॥ ५ ॥ लोकेशाद्यस्तारकयोगाद्यमनन्तं स्वत्वेनान्तः पश्यति यन्नस्तुत एकम् । वाचा नाप्यो नापि हृदेति श्रुतिमूलात्सच्चिन्मात्राकारमजं तं कलयेऽहम् ॥ ६ ॥ संसारान्धूद्धारवरत्राभिध विष्णो चित्तेकृत्य त्वामज पूजां विदधेऽहम् । तन्नोऽनन्ताधिष्ठितमूर्ते कुरु शंभो सन्तप्तानामान्तरसौधोदकधार ॥ ७ ॥ यत्पद्माकैवल्यपदं यात्य-निवर्त्यं साक्षी सर्वस्यापि य एकश्चितिरूपः । सान्द्रानन्दो भक्तमनो-ज्योत्स्निकयाक्तस्तन्द्रामन्तः कृन्ततु नित्यं मम सोऽजः ॥ ८ ॥

हरिः ॥ कल्याणदत्रिदिवकुल्यावहेलकृतिकल्यानुरूपकृपयाऽतु-ल्यापकार्यररुशल्यावसित्यशनिबल्याशयेश भगवन् । अल्याहताङ्घ्र पदधूल्यापवार्य मतिशूल्याधिमाशु सुरभूबल्यात्मको भव सुगल्या-रवप्रिय नृपल्याचितास्य सुखने ॥ १ ॥ शङ्काविहीनमजसंकाशका-र्यमिह पङ्कादुदञ्चयसि नो किं कारणं तदिममिंकारगेश वद कं काल-वैतु शरणम् । अं कामितद्युतरुमङ्कादुपेक्ष्य च कथंकारमच्युत हरे शं कामयेत बत तङ्कातिरम्यपदपङ्काधिजात परतः ॥ २ ॥ नन्दा-त्मजं कुपितवृन्दारकेन्द्रमदकन्दानुरूपखनकं वन्दामहे रुचित-वृन्दावने शिशुकवृन्दैस्सुहिण्डिततनुम् । वन्दारुमौनिजनमन्दा-रकं स्फुटितकुन्दानुगस्मितसुधाचन्दायितं निहतसुन्दात्मजं परम-मन्दादरं परगुरुम् ॥ ३ ॥ जंभान्तकद्विरदकुंभाभ्रयगोपिकुचसंभार-मर्दनकरं तं भावये कनकरंभास्थपत्रसुभगंभावुकांबरधरम् । कुंभारमांस्यपविडंभास्तहस्तपरिरंभान्वयेन सुखयन्नभांसि यो वैजति मां भालयेत च नु डिंभाश्रयैकचरणः ॥ ४ ॥ बन्धार्तिमाशु मम सिन्धावधीतगतिरन्धांबकोऽपनयतादृन्धाब्धभूरुडनुब-

---

१ दामरज्जुर्वरत्रा चेति शब्दव्यूहतरङ्गिणी ॥ २ तुल्यसंकाशनीकाश इति कोशः ॥ ३ हिडि–क्रीडायाम् ॥ ४ अपास्य ॥ ५ वज–गतौ ॥

Digitized by Google

न्धाभिषेककरसन्धापरः स मधुहा । मांधातृसूनुहितसन्धानव-
ल्लिमिह यं धातृमुख्यऋषति स्कन्धान्तरेयमपि सन्धारयामि च
सगन्धान्तरगंकरिणः ॥ ५ ॥ वित्तेशसूनुसुखवृत्ते कृपाजलल-
वोत्तेजितो मुररिपुश्चित्ते चकास्तु मम मत्तेभभीहरणवित्तेङ्गितः
प्रतिपलम् । कृत्तेतरेशमतिमत्तेह एव लघु नुत्तेन्द्रनीलविभवो
दत्तेष्टिराज इह नृत्तेष्टशंभुवलिसत्तेडितोरुचरितः ॥ ६ ॥ गन्ताऽ-
स्म्यहं शरणमन्तातिगं भुजगकृन्ताधिरूढमिति मच्चिन्तामर्त्यरिपु-
हन्ता निवारयतु सन्तापनीं करुणया । नन्तात्मदेवमतिसन्तान-
लिप्सितसुचिन्तामणिर्यदुकुलेऽनन्तानुजात उरुसन्तानकप्रतिमद-
न्ताश्रयस्मितसुधः ॥ ७ ॥ एणाङ्कचूडपरबाणायितो रुचिरशोणा-
ब्जबन्धुचरणः प्राणाधिकस्वजनपाणावपि प्रथितवीणाक्वणे ख
उदितः । प्रीणातु नोऽसुरकशाणाधिकं स इह हूणादिकं च बलतः
क्षीणाति यः सुगुणिनॄणां कृते सपदि बाणाहमः प्रशमनः ॥ ८ ॥
श्रीबालकाह्वयमुनिप्रवरांघ्रिपद्मभल्लाक्षनीलगलनामकनिर्मितं यः ।
भक्त्या विधुस्तवमधुद्रवमन्तरङ्गे कुर्यान्नवेत्स यतधीः परिपूर्ण-
कामः ॥ ९ ॥

इत्यष्टकत्रयपरिमितो विधुस्तवमधुद्रवः समाप्तः ॥

स्वात्ममुधाकरप्रारम्भः ।

हरिः ॐ ॥ स्थास्नुचरिष्णुपदार्थावेशादर्शे निजानुभवगम्यम् ।
सच्चित्सुखस्वरूपं शिशुसंज्ञमहं स्मरामि किमपि महः ॥ १ ॥
अतिदुर्लभं नृजन्म प्राप्य नहि त्वं सिषाधयिषसि यदि ।
पुरुषार्थं पुंस्त्वास्य केह तवाहारमुख्यतः सैषा ॥ २ ॥
चेत्सार्था पशुताप्यलमिति घट्टकुटीप्रभातवक्त्वायम् ।
संश्रयसि भोगिलोकातो मम वचनं शृणुष्व सुखमृच्छेः ॥ ३ ॥
स्वाप्ययमायानूना जाग्रत्कालिक्यवेहि सम्यगिति ।
विशयो यदि चेत्प्रत्यग्दृष्टिमवष्टभ्य दर्शने यस च ॥ ४ ॥

---

१ राजहंसस्तु भल्लाक्षः । इति कोशः ॥ २ साधयितुमिच्छसि ॥ ३ पुंस्त्वम् ॥

Digitized by Google

संरूढेऽस्मिन्नाग्रन्मायाऽस्तमियात्सुषुप्तिगेवास्याः ।
जातेयं कुत इति मा चिन्ताऽस्त्वस्त्वपि तु कथमिमां हन्याम् ॥५॥
अविचारितरमणीया कथितेयं तत्त्ववादिभिर्वीक्षाम् ।
सहते न यत्स्वरूपं भ्रान्तिग्राहग्रहं स्मरैषि पदम् ॥ ६ ॥
अहमस्मि नित्यशुद्धः प्रत्यगभिन्नस्तथोऽपधिविहीनः ।
'न निरोध' 'एक एवाग्र' एवमादिश्रुतिर्भणति यस्मात् ॥ ७ ॥
क्षिपरिच्छित्तिविहीनस्तद्वदहं क्षिविधभेदभिन्नोऽस्मि ।
अन्यस्मिन्नहमर्थारूढ्या भेदश्रुतेरभावाच्च ॥ ८ ॥
इदमर्थभूतबाह्यप्रपञ्चवस्तुष्वनात्मतैवमिह ।
अहमर्थ आत्मता च स्वानुभवाद्बुधजनस्य चाभिमता ॥ ९ ॥
एते इदमहमाख्ये बुद्धी स्यातां विभिन्नविषयेऽत्र ।
देहे चेदंकारा धीर्देहालंबनाऽपराऽऽत्मवशा ॥ १० ॥
स्वशरीर इदंध्यास्पद इह याऽहंमतिरियं महाभ्रान्तिः ।
यत्तदतस्मिंस्तद्रूपाऽभ्रान्तस्य न क्वचिद्भवति ॥ ११ ॥
जडरूपपिण्डमेतन्नाहंधिषणाश्रयं ह्यनैकान्त्यात् ।
मृत्पिण्डादिषु तद्वत्स्यान्नोऽचित्वाऽविभेदतः खमुखम् ॥ १२ ॥
तस्माच्चिद्रूपात्माऽहंबुध्यर्थोऽचिदेवमिदमर्थः ।
एष स्वयंप्रकाशोऽस्याहंविषयत्व एव सति साक्षात् ॥ १३ ॥
वृत्त्यनधीनतया घटकुड्यव्यतिरेकतो यतः स्फुरति ।
साक्षित्वेनाच्छान्तर्व्याप्याज्ञानं सवृत्तिरूढचिदा ॥ १४ ॥
ग्रसतेऽस्तमेति वृत्तिस्तस्मायःपीतशंबरन्यायम् ।
स्वात्मन्ययमहमस्मीत्यवधारय निर्वृतिं परां च भज ॥ १५ ॥
योऽहंशब्दार्थोऽयं त्वंशब्दार्थो भवेन्न सन्देहः ।
त्वंप्रत्ययार्थ एवं स्यादहमर्थोऽपरो न कुत इतिचेत् ॥ १६ ॥
लक्ष्यीकुरुत उभौ तौ शब्दावेकं चिदात्मवस्तु यतः ।
अर्थमिमं श्रुतिराहाहंब्रह्मास्मीति याजुषी मधुरम् ॥ १७ ॥
जहदजहल्लक्षणया वैशिष्ट्यांशप्रहाणतः सिध्येत् ।
सम्यगखण्डरसस्तत्त्वमहंब्रह्मेति मुख्यवाक्येषु ॥ १८ ॥

Digitized by Google

स्वात्मान्यतया भातं बुध्वाऽऽत्मत्वेन चैतदात्म्यमिदम् ।
सर्वमितिश्रुत्यैतद्वेदनमपि चिद्घने विलाप्य परे ॥ १९ ॥
स्वस्थो भवति नरश्चेच्छन्नपि मुच्यते 'जगत्सत्ता ।
तत्सत्तयैव सिद्धा कारणसत्तैव कार्य इष्टेति ॥ २० ॥
एकत्वेऽपि पृथक्त्वेनोक्तिः प्रत्यक्प्रकाशरूपस्य ।
अन्तःकरणविभेदानुरोधतः सर्वसाक्षिणो भवति ॥ २१ ॥
औपाधिकभेदेऽस्य प्रलीन ऐक्यं व्रजेच्चिदा खमिव ।
घटनाशे तत्सर्वत्यागे यत्स्यात्तदात्मना भाव्यम् ॥ २२ ॥
समवस्तुपरित्यागे शेषस्त्वात्मेति शासनाच्छुत्या ।
निष्ठामास्थायैतामन्तेऽपि नरो यदेति लघु मुक्तिम् ॥ २३ ॥
श्रुत्येह चेदवेदीदित्यनयाऽऽत्मैकवित्तिरुपगीता ।
नोचेन्महती नष्टिश्चोक्ता तस्मान्नृलोकगामिपशुः ॥ २४ ॥
यः कुशकाशालंबन्यायेन पदं समारुरुक्षति सः ।
पुरुषपदवाच्य एषोऽपर इह शोच्यः सदाऽऽदिमो वन्द्यः ॥ २५ ॥
अत्र तु मर्यादैकावनमुपदेशक्रमस्त्विति जगाद ।
ज्ञैसेर्हेतुर्भगवान्वसिष्ठ इति चान्तवासिशुद्धमतिः ॥ २६ ॥
तत्संशोध्य प्रज्ञां देशिकमेकं समाश्रयेद्यदिह ।
श्वश्रूनिर्गच्छोक्तिन्यायेनास्याधिकारिताऽऽत्मगिरि ॥ २७ ॥
करुणाघूर्णितचित्तो देशिक एतं स्वरूपसाम्राज्ये ।
अभिषेक्ता चिन्मुद्राबन्धनतस्तं द्रुतं शरणमीयात् ॥ २८ ॥
देहाक्षादावहमिति ममेति यो भाव एषकोऽध्यासः ।
विदुषाऽवश्यं त्याज्यः सम्यक् स्वात्मैकनिष्ठयाऽयमपि ॥ २९ ॥
वासनयाऽध्यासोऽस्यास्तानवमाहुर्विमुक्तिरित्यृषयः ।
तत्तां तनुतां नयताश्नैरन्तर्यस्वरूपनिष्ठातः ॥ ३० ॥
चेल्लक्ष्यच्युतमीषद्बहिर्मुखं धीस्ततस्ततो निपतेत् ।
सम्यक् प्रमादबलतः सोपानच्युतविलासकन्दुकवत् ॥ ३१ ॥
अपकृष्टं शैवालं यथाऽऽवृणोति क्षणाज्जलं च तथा ।
मायाऽऽवरते प्राज्ञं वाऽपि पराङ्मुखमतोऽन्तरद्गास्व ॥ ३२ ॥

---

१ वेदनं (ज्ञानम्) । २ ज्ञप्तिर्ज्ञानम् ॥

Digitized by Google

अन्तःशीतलतायां लब्धायां शीतलं जगद्यस्मात् ।
तस्मात्प्रत्यग्दृष्ट्या स्थेयं पाषाणवत्समाप्यैताम् ॥ ३३ ॥
हृदयग्रन्थेर्विलयस्तदैव निःशेषतो यदा यमिनाम् ।
अद्वैतावस्थानाह्वयसहजातः स्वदर्शनं भवति ॥ ३४ ॥
चित्तेऽर्थादर्थान्तरमीते या स्थितिरिमामधिष्ठाप्य ।
मूकान्धबधिरकल्पं स्थातव्यं योगिभिर्निजानुभवे ॥ ३५ ॥
अभिलषितवस्तुलब्धिक्षण इह याऽन्तर्मुखस्थितिरुदेति ।
तामाश्रित्य समस्तं विरहय्य सदाऽनुभूतिगो ना स्यात् ॥ ३६ ॥
संत्यक्त्वाभावेभ्यः सर्वेभ्यो भावनां तदवशिष्टा ।
या संविद्ब्रह्माख्या सैवाहमिति स्थितो भवेत्सततम् ॥ ३७ ॥
कल्पितसर्वपदार्थाधिष्ठानं ब्रह्म केवलं कथितम् ।
यत्तदहमस्मि नित्यं परमिति मौनेन तत्पदं समियात् ॥ ३८ ॥
वैराग्यस्य फलं स्यादात्मज्ञानं तथोपरतिरस्य ।
हेतुस्वरूपकार्याण्यपि क्वचिद्व्यभिचरन्ति कस्मिंश्चित् ॥ ३९ ॥
एवमपि पूर्णबोधे विदेहकैवल्यभाग्भवेत्कोऽपि ।
वैराग्योपरतिभ्यामृतेऽपि ताभ्यामिहोर्ध्वगतिरेव ॥ ४० ॥
बाह्यैश्वर्यतृणीकृतिरवधिर्विरतेः स चैष बोधस्य ।
देहात्मवदेवास्य स्वरूपसम्पत्तिरूपदार्ढ्यो यः ॥ ४१ ॥
मर्यादोपरमस्य स्वाप्ययवद्विस्मृतिः परा यैषा ।
कञ्चित्कचित्पुमांसं त्रयोऽपि वृणतेऽस्य निर्मलतपस्तः ॥ ४२ ॥
जीवन्मुक्तिसुखेच्छुः संगृह्णीयात्समं निरपवादम् ।
ज्ञानान्तरङ्गसाधनमेव हि मननाद्यपेक्षया श्रवणम् ॥ ४३ ॥
आचार्यैः श्रवणं नामाङ्गि विधीयत इतीरणाङ्गे स्तः ।
मननिदिध्यासाख्ये नो बाह्याङ्गे शमादिकमपेक्ष्य ॥ ४४ ॥
उत्तरमीमांसाकृद्भगवान्व्यासोऽथशब्दतः प्राह ।
साधनचतुष्टयानन्तरकृत्येत्येव चात्मजिज्ञासा ॥ ४५ ॥
साधनसुभगंभावुकपुरुषमनालोच्य वरतिबोधतनुः ।
दिक्संख्याकं साधनमवश्यमर्ज्यं मुमुक्षुणा प्राक्तत् ॥ ४६ ॥
ज्ञानं च वस्तुतत्रं ह्युपासनं कर्तृतत्रमिति विद्यात् ।
बोधोऽनिच्छायामपि यत्स्याद्विषयेन्द्रियादिसंबन्धे ॥ ४७ ॥

Digitized by Google

अन्यदकर्तुं कर्तुं वाऽपरथाकर्तुमेष शक्तो ना ।
तस्मात्तत्तदधीनं प्रतिबन्धे सति भवेन्न दृढबोधः ॥ ४८ ॥
नात्र विचारोऽपगुणः स्यात्कचिदपि तन्निरुध्य प्रतिबन्धम् ।
सततं चिंतयतादा मृतेः स्वरूपं न चेद्भवति सिद्धिः ॥ ४९ ॥
अन्यस्मिन्वा जन्मन्यैहिकमित्यादिसूत्रतः श्रुत्या ।
शृण्वन्तोऽपीत्युक्ता स्यादेव च तत्पुनः पुनर्विमृशेत् ॥ ५० ॥
पूर्णानुभूतिमीतः कुर्वन्निव कर्म लक्ष्यतेऽपि जनैः ।
दग्धपटन्यायेन स्थित्वाऽन्ते स्वप्रतिष्ठितो भविता ॥ ५१ ॥
चेत्संकल्पाशानुसन्धानहानं कुर्यान्मर्त्यः सर्वदाऽचित्ततां सः ।
संप्राप्तः स्याच्चेतसोऽकर्तृता या शास्त्रादौ सा निर्वृतिः सा समाधा ॥
प्रोक्ता साक्षात्केवलीभाव एतस्मिष्ठो भूयाद्भूय उत्पत्यकाङ्क्षी ।
स्वारब्धान्तेऽत्यन्तदेहापयोगे वैदेहीं चोपैति मुक्तिं स्वविद्वान् ५३
ॐ५ ॥ बालाङ्कभगवत्पादकिङ्करोऽसितकन्धरः ।
विरच्यात्मकलानाथं भक्तितस्तत्पदेऽकरोत् ॥ ५४ ॥ ओं शान्तिः ॥

इति स्वात्मसुधाकरः समाप्तः ॥

श्रीयोगमञ्जरी ।

हरिः ॥ मम तु भगवद्बालाख्यश्रीविकर्तनविग्रहं विबुधसहजासंवित्सस्यप्ररूढसुरद्रुमम् । कविकुलगिरां दूरं पारं भवज्वरवारिधेः सततमभयायैषोऽहं संनमस्य उपारतम् ॥ १ ॥ पवनयमनाद्धंसः सोऽहं स्वयं परमित्यहो विदितचरितोऽप्येवं न स्यान्नरः स्वयमित्यहम् । नियमनविधिं वक्ष्ये तद्वाक्परिश्रमतो गतो भवति हि मरुत्प्राणः शून्यं पदं विवृतामृतम् ॥ २ ॥ वृषणगुदयोर्मध्ये मूलं पदस्य नियोजयंस्तदितरमथो मेढ्रे कृत्वा दृढं हृदये हनुम् । स्थिरतरदृशा नासाग्रं स्वं निरीक्ष्य जितात्मवान्स्थितिमिह सदा कुर्यात्सिद्धं भवेदिदमासनम् ॥ ३ ॥ हितमितभुजो मुद्गं शालिं यवं च सितां पयोघृतयुतमिहाश्नन्तो नित्यं वसेयुरथासने । निजपदतले

---

१ ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात् । ब्र० सू० ३ । ४ । ५१ ॥
२ शृण्वन्तोऽपि बहवो यत्र विद्युरितिश्रुतिः ॥ ३ समाधानम् (समाधिः ॥)

Digitized by Google

ऊर्वोर्यस्मिंस्थितौ भवतो दृढं बहुतररुजामस्त्रं पद्मासनं त्विदमुक्त-
मम् ॥ ४ ॥ जितरय इतो बाह्यं वायुं प्रपूर्य सुधांशुना निजबल-
समं यावच्छक्यं निरुध्य मरुन्मनाः । पवनविलयो नासाग्रे
यद्भवत्यतिवेगतो मरुतमखिलं मन्दं मन्दं त्यजेदथ भानुना ॥ ५ ॥
यत इह मरुत्यक्तो नाड्यामवेदनया खगं पुनरपि कलासंख्या-
मात्रात्मकेन च पूरयेत् । नियमितमसुं कृत्वा तस्माच्चतुर्गुणमात्रया
पवनमिडया तस्यार्धेन त्यजेत्समयेन वा ॥ ६ ॥ विसृजतु खगं मन्दं
मा भूद्रुतं बलहानिकृद्भवति च यतः शीघ्रं वा स्यान्मरुद्ग्रहणं हठे ।
प्रहरपरतः सर्वत्रैवं दिनं प्रति शीलयेद्विजितपवनः कोऽपि स्याच्चे-
त्स्वयं गुरुशिक्षितः ॥ ७ ॥ पवनविजये बद्धाकूतः सदा मृदुपीठगो
वदनकुहराकृष्टं वायुं यथाविधि कुम्भयेत् । परशिवगते केदारे
स्यान्मरुद्गमनं यथा पिहितवदनः फूत्कारं तत्तथैव समाचरेत् ॥८॥
अथ निजपदग्रन्थिं मूले दृढं घटितं व्यधादितरमपि तत्कृत्वा
जानोरधःस्थितसंधिगम् । उपरि गतधीः सामोदं स्त्रां निपीड्य च
सीवनीं पवनगमनं ब्रह्मद्वारे कुर्यात्परमादरात् ॥ ९ ॥ द्वितयम-
धिकं गुह्यं गुह्यादिदं परयोगिभिः परिचिततरं साक्षात्सिद्धेः सदा
परमायनम् । निजहृदि हनुं निक्षिप्योर्ध्वाकर्षादनिलः शनैरमृतकु-
हरं गच्छेत्स्वैरं निरञ्जननामकम् ॥ १० ॥ मूलाधारे पवननियम-
श्चेतसा कार्य उक्तस्तस्मिंल्लीनं भवति हि मनो यावदेवं विदध्यात् ।
भूयस्तस्मादुपरि मरुतं कन्दपार्श्वे निरुन्ध्यात्स्वस्थो भूयान्नर इह
समाः सर्वरुग्जालमुक्तः ॥ ११ ॥ तद्वच्छून्ये नियमनबलान्निर्जितः
प्राणवायुर्दद्यादायुर्नियतममरप्रार्थितांश्चैव सिद्धीन् । पार्ष्णि योनौ
घटितमपरं भूमिसंलग्नपृष्ठं कृत्वाऽक्रुष्टं दृढपरिकराबद्धमप्याशु
कुर्वन् ॥ १२ ॥ आपूर्याभ्रंकषमथ बलात्कण्ठबन्धं विधास्यन्प्राणं
मध्ये नयतु विधिनेयं महामुद्रिकोक्ता । तावद्यावद्भवति
सदृशा संख्यया वामभागे सूर्याङ्केऽथाप्यनुदिनमिमां शीलयेद्यु-
द्धियुक्तः ॥ १३ ॥ नीत्वा चञ्चूपुटसदृशतामोष्ठयोर्लग्नजिह्वामाकृ-
ष्याभ्रंकषमृजुमनाः कुम्भयित्वाऽथ मन्दम् । फूत्कारं चिद्गगनकुहरे
सन्ततीकृत्य मोदात्कुर्यान्नासापुटयुगवशाद्रेचकं गुह्यमुक्तम् ॥ १४ ॥

Digitized by Google

एतत्क्षुत्तृड्ज्वरहरमतिप्रौढशास्त्रप्रबन्धे शक्तिं दद्याद्धृदि परसुखं चैव कार्यं तदेवम् । कारोर्भस्त्रासदृशमिह यः पूरयेद्रेचयेच्च नाडीशुद्धिर्भवति यमनादग्निमासोर्ध्वतो वा ॥ १५ ॥ कुंभो द्वेधा भवति सहितः केवलश्चेति तावत्कुर्यान्नित्यं सहितमिह यावद्गवेत्केवलाख्यः । हित्वाऽऽकर्षं पुनरपि मरुद्रेचकं साधितेऽस्मिन्सम्यक्सिद्धं दिवि भुवि समुद्रादिकेऽप्यस्य सर्वम् ॥ १६ ॥ मात्रावृद्ध्या परिचितमरुद्ब्रह्मरन्ध्रं गतश्रेष्ठादव्यक्तिर्भवति सुतरां कुण्डलीसुप्रबोधात् । सेयं शक्तिः स्वपिति नियतं ब्रह्ममार्गं स्ववक्त्रेणाच्छाद्यैनामुपरि गतनिद्रां नयेत्सावधानम् ॥ १७ ॥ पार्ष्ण्यां बध्वा गुदमथ समाकृष्य मध्यं स्वकीयं पश्चाद्वायुं हृदयकमले कण्ठसङ्कोचनेन । गाढं बद्धं कुरु निजहनुं कुण्डलीबोधनार्थं सम्यग्बन्धत्रितयमुदितं जन्मसंसारजैत्रम् ॥ १८ ॥ दीर्घीकुर्वंस्त्विह शिखिशिखां मारुतेनाहतां संतप्तां कृत्वा द्रुतमथ तयोत्थापयेदादिशक्तिम् । बन्धश्चैवं नयति पवनं मध्यमार्गं स्वयं हृद्युक्तं कुर्यान्नियतमपरं द्वन्द्ववर्गं च वेगात् ॥ १९ ॥ अस्मिन्नित्यं दृढपरिचिते नामृतः कोऽत्र भूमौ गत्वा मृत्योर्वदनकुहरेऽप्यस्य भीर्नैव यत्तत् । पारम्पर्यादधिगतमिदं शीलयेन्नित्ययुक्तः संसिद्धिस्तं प्रविशति तरां सम्यगभ्यासयोगात् ॥ २० ॥ स्वोदर्याग्नेर्जलमिव भवेदन्यथा शीलितश्चेदुड्डीयानो विधिमनुसृतो मातरिश्वायते च । तद्वत्कण्ठीरवपतिरयं मृत्यिवभेन्द्रस्य चोक्तः सम्यङ्नोचेदपि यमवतां कालतीच्छातिगत्या ॥ २१ ॥ मूलस्थाने प्रवदति सुधीर्मूलबन्धं तदूर्ध्वं तूड्यानाख्यं नियमिविनुतं पश्चिमं तानरूपम् । नाभौ वक्षस्यपि च चिबुके स्थापिते वक्ति चैतं साक्षाज्जालन्धरमिह सुधापातविच्छेदहेतोः ॥ २२ ॥ मूले बन्धो भवति सुखदः सर्वदाऽभ्यासयोगे कंठस्थाने स तु नियमिनां पूरकान्ते दृढः स्यात् । कुम्भान्ते संस्मरति नियतं रेचकादौ विशिष्टं तूड्डीयानं निरवधिकृपापूर्णतीर्थांघ्रितीर्थम् ॥२३॥ चेतोवृत्त्या भवति मरुतो धारणा यत्र सम्यक्तत्रोत्थान्संहरति सकलानामयाञ्शीघ्रमेषा । तस्मात्कार्यं पवनयमनं षोडशाधारदेशेष्वकुष्ठादिष्वपि नियमिना सर्वदाऽऽरोग्यसिध्यै ॥ २४ ॥

Digitized by Google

बध्वा वामेन तु चरणपाष्ण्यैंव योनिं तदूरुण्यन्यं पादं सपदि घटयन्भूमिसंलग्नहस्तः । मन्दं मन्दं नियमितमनाः स्वस्फिचौ ताडयेद्यस्तस्यारूढो भवति पवनः शून्यमार्गे क्षणेन ॥ २५ ॥ सिद्धैर्गुप्तो निरुपमगुणैर्यो महावेध उक्तः सोऽयं ह्येतद्भयमसुभृताम-ष्टसिध्येकपात्रम् । यन्तं मृत्योर्वदनकुहरस्येन्द्रजालैकजालं तस्माच्चित्यं दृढमनुसरेदस्य संशीलनं ना ॥ २६ ॥ पूर्वं स्वेदोद्भव इह मतो मर्दनं तेन कार्यं पश्चात्कम्पस्तदनु भविता दार्दुरी पद्मपीठे । प्राणायामोत्तम उपगतत्वंग्निमाक्षासमं यो रोधस्तस्मिन्विसृजति भृशं भेकवद्युक्तयोगी ॥ २७ ॥ सिन्धुब्जायीगतलवणतस्तालुमूलं दिनादौ घृष्ट्वा जिह्वोद्गमनविधिना चालनं चैव दोहम् । कृत्वाऽऽ मासं स्पृशति सुखवृत्त्यैव सा नासिकाग्रं यत्तन्मूलस्थितलघुसिराक-र्तनं तेन कुर्यात् ॥ २८ ॥ यस्येयं संस्पृशति पथमेवैष योगार्ह उक्तो यस्याद्यस्य स्पृशति सततं मध्यमोऽयं ततोऽन्ये । हीनाः क्षाराद्विलय इह नोचेत्सिराबन्धनस्य हन्त्रीवल्या ज्वरपदगया छेदकार्यो न चान्यैः ॥ २९ ॥ ह्योगोदोहोद्भवमथ जले भृङ्गराजस्य सम्यक्पक्त्वा जिह्वां गमय सह तेनोर्ध्ववक्त्रां कपाले । संघृष्यादौ खमुपरिगं संस्पृशन्ती स्थिता यत्तन्मुद्रैषा जगति परमा योगिसर्व-स्वपटी ॥ ३० ॥ खेचर्याख्या भवति रसना चित्तयुक्ता खसंस्था ह्यन्वर्थैषा जनिमृतिमहारण्यभेत्री कुठारी । एवं चन्द्रामृतमपि पिबेद्यः क्षणं संस्थितः सन्मासादर्वाग्जयति यमवान्कोऽपि मृत्युं न शङ्का ॥ ३१ ॥ क्षुत्तृष्णमोहज्वरजडिमरोगादिकं नास्य किंचि-द्विन्दोः पातो नहि भवति यस्यास्ति मुद्रा समुक्ता । जीवेत्सोऽयं चिरमिह मृणालातिकान्तिर्नराभ्यः सारज्ञोऽष्टादशविभवयुक्चैव नित्याधिवासी ॥ ३२ ॥ उज्जिह्वोऽथाङ्गुिति शशिसिरायां तथोङ्ग सूर्यनाड्यामप्यामन्त्र्याधिकतररयाजिह्वया ताडयित्वा । मङ्ग खे तद्वद्गमय सह वायुं तया मध्यनाड्यामेतङ्गुह्यं यमिवरगुरोर्वाङ्म-रन्दं प्रपद्ये ॥ ३३ ॥ जिह्वामन्तर्दशमथ बहिर्भ्रूयुगान्ते निबद्धन्नी-रूपं यः स्मरति भगवद्रूपमत्रैकचित्तः । उन्मन्यस्मिन्क्षण उदयमी-यात्स्वयं राजयोगाकाङ्क्षी चैतां कलयतुतरां शीघ्रसिध्या इयं

Digitized by Google

यतं ॥ ३४ ॥ नित्यं सारप्रपतनवशात्तालुमूलस्थचन्द्रात्कायापायो न तु नियमिनां खेचरीसिद्धिभाजाम् । चन्द्रस्थैर्यं कुरु नियतवृत्त्यैव तद्वन्धनाद्यन्नान्यः पन्था जगति विहितः कायसिध्यै नराणाम् ॥ ३५ ॥ ज्ञात्वा कालागमनमसृतस्यन्दसंदोहगेहं गत्वा स्थातुं यमिभिरमरारातिधैश्शक्यते हि । यस्मात्कालोऽप्यभिभवति नो यद्गृहाधिष्ठितं तत्कर्मैतत्प्रोच्यत इह मुदा वञ्चनं कालमृत्योः ॥ ३६ ॥ सोऽहंभावान्नयनयुगलं किञ्चिदुन्मील्य वा यस्त्वन्तर्भ्रूयुगदहरविवरादूर्ध्वगं सञ्चिदेकम् । तेजः पश्येत्स्थिरतरदृशा भ्रूयुगं किंचिदुत्क्षिप्यास्यैव स्यादनुभवबलं दिव्यदृष्टिश्च तस्मिन् ॥ ३७ ॥ एषा शांभव्यखिलयमिनां सन्ततानन्दवल्ली भद्रा मुद्रा निखिलनिगमान्तार्थगम्याऽतिगुप्ता । तुर्यावस्थां जनयति सदा सम्यगभ्यस्यमाना सिद्धिं चैवोपरि बहुतरां यत्नवर्जं क्षणेन ॥ ३८ ॥ तर्जन्या यः पिहितनिजकर्णे स्वनं यं शृणोति सञ्जिह्मीने मनसि नयनान्तर्गतानीलरूपम् । ज्योतिःस्थानं सततमवलोक्यायमाप्नोति शीघ्रं पूर्णानन्दामृतपदममेयं निरालंबवृत्त्या ॥ ३९ ॥ यस्मिन्स्वच्छे ख उपरतं स्यान्मनो निर्निरुद्धं यस्मिन्दृष्टिर्भजति सुतरां स्थैर्यमालोकहीना । यस्मिन्काले पवनविलयश्चापि मुक्त्वाऽवरोधं तस्मिन्काले भवति सहजा खेचरी सिद्धिरुक्ता ॥ ४० ॥ यमीन्द्राणां हृत्कैरवसुकृतपूर्णामृतकरो जयत्यद्वैताख्यश्चुदधिनिलयो योऽत्र विदितः । शिशोर्नाम्ना तत्पदतिरहमिमां नीलगल इत्युदीतः सम्पाद्यार्पय उपरि योग्युक्तचरणे ॥ ४१ ॥

हरिः । ओम् ॥ इति योगमञ्जरी समाप्ता ॥

इति नीलकण्ठयमीन्द्रस्य कृतिषु भक्तिज्ञानतरङ्गिणी समाप्ता ॥

अमृतलताप्रारम्भः ॥

ओं नमो गणेशाय हरिः ॥ तस्या अर्भकनाम्ने कस्मैचन तेजसे नतिः सैषा । खानिलवन्ह्यब्ज्यान्तं स्वकफणिसदृशं यतः समुद्भूतम् ॥१॥ प्रणिगदिकर्मीक्रियते परमिह संवित्स्वरूपमिति सर्वैः । भद्रं कृषीष्ट

---

१ प्रतिपाद्यते—निगद्यत इत्यर्थः ॥

Digitized by Google

हैयंगवीनपेषं प्रपिष्य दौर्भाग्यम् ॥ २ ॥ मायाकार्यमशेषं मायैव परं निरूपणे नान्यत् । यद्घटकटकाद्यखिलं मृद्धाटकमुख्यरूपतो विदिम् ॥ ३ ॥ स्वप्न इवात्र च कण्ठे जाग्रति चित्कुड्य एव सेयमपि। जागतचित्रं रचयति नश्यति सम्यङ्निरीक्ष्यमाणैषा ॥ ४ ॥ सह कार्येण हि तुच्छाऽनिर्वचनीया च वास्तवी कथिता। श्रौत्या विचारदृष्ट्या लोकदृशा चापि सा स्वयं क्रमशः ॥ ५ ॥ यामा सेर्वं मायाऽविद्या या नैव विद्यते साक्षात् । प्रोच्यत एवं बहुधा ज्ञानेन विनश्यतीति चाज्ञानम् ॥ ६ ॥ अपवरकस्थतमोवत्स्वाश्रयविषयेयमीर्यते मुनिभिः । जीवाश्रयेति केचन तन्नसमञ्जसमदोऽनुभवदौस्थ्यात् ॥ ७ ॥ यत्पूर्वसिद्धतमसः पश्चिम इह नाश्रयस्तथा विषयः। अपिच भवेज्जीवाश्रयताऽज्ञानाभिमानिता बलतः ॥ ८ ॥ तिम्मगुमिवान्धकारं नावरिता चितिमितीह मास्तु धृतिः । साऽस्या वृत्तिचितेरिव यन्न विरोधः स्वकीयसंश्रयतः ॥ ९ ॥ तदिदं तथा यथाऽरणिसंस्थशिखी नैव बाधकस्तमसः । किन्तुमथनोत्थपावक एव भवेत्साधु साधकस्त्वपरः ॥ १० ॥ विक्षेपावृतिभेदेनेह द्वैरूप्यमुच्यते शक्तेः। विक्षेपाभिधशक्तिर्लिङ्गाद्यण्डान्तमुत्सृजेदपरा ॥ ११ ॥ आवरणाख्याऽऽवरते ह्यन्तर्दृग्दृश्यभेदमथ बाह्ये । सर्गब्रह्मविभेदं चैषा संसारहेतुरिति विद्यात् ॥ १२ ॥ लोकं कर्तुमकर्तुं वाऽपरथा कर्तुमीशत इतीशः । वशमायोपधिरुदितः श्रुतितः स ब्रह्म कारणं कथितम् ॥ १३ ॥ जागतविभ्रमवर्गस्याधिष्ठानं भवेद्यदेतदिह । त्रैयन्तेषु समुक्तं ब्रह्मपदेनान्वहं स कूटस्थः ॥ १४ ॥ योऽधिष्ठानतयोक्तो देहद्वयचेतनस्तु नः साक्षी । जीवः साधिष्ठानव्यष्टयज्ञानोदरस्थिताभासः ॥ १५ ॥ सत्यो भवति न चैषां भेदस्त्वौपाधिको भवेत्किन्तु । ऐक्यमखण्डरसं तद्वटेत वेदान्तवाक्यपरिनिष्ठम् ॥ १६ ॥ शुद्धश्चिदीशो जीवस्तद्द्वैजीवेशयोर्भिदाऽविद्या । तच्चिदुपराग एवं षण्णोऽनादय उदीरिता आर्यैः ॥ १७ ॥ संसृतिव्रततेर्बीजं वाऽध्यारोपं वदन्त्यथाध्यासम् । सोऽतस्मिंस्तद्बुद्धिः सै-

---

१ दौरात्म्यम् । इति पाठः ॥ २ गृहम् ॥ ३ ईशत ईशनीभिः । इति अथर्वशि० उ० ॥ ४ स्वनयोर्भेदो द्वयोस्तथेति पा० ॥ ५ समः सर्वः ॥

Digitized by Google

मजन्तुसमो द्विधायमुपदिष्टः ॥ १८ ॥ एको ज्ञानाध्यासस्त्वन्योऽर्थाध्यास उच्यते च पुनः । अर्थाध्यासो द्वेधा स्वरूपसंसर्गभेदतः कथितः ॥ १९ ॥ अज्ञानविषयरज्वहिरर्थाध्यासः समादृतः सद्भिः । रज्जुभुजङ्गज्ञानं ज्ञानाध्यासश्च सम्प्रोक्तः ॥ २० ॥ आत्मन्यनात्मवर्गस्योक्तोऽध्यासः स्वरूपतस्तस्य । संसर्गाध्यासः स्यान्नित्यमविद्याद्यनात्मनिवहे तु ॥ २१ ॥ अप्रत्यक्षाकाशे तलमलिनत्वादिकं च यद्बालाः । अध्यस्यन्ति परेऽप्यय एवमविद्याद्यनात्मकारोपः ॥२२॥ यस्याभावेऽध्यासो भवेन्न तस्मादनाद्यनिर्वाच्यम् । अध्यासोपादानं मन्यत इह भावरूपमज्ञानम् ॥ २३ ॥ एतमविद्याख्यं पुनरन्योन्याध्यासरूपमनुरुध्वा । लौकिकवैदिकमुख्यव्यवहाराः स्युर्न सन्तु तेऽथ यथा ॥ २४ ॥ खादिष्वहं वियुक्तस्येह नहि स्यात्प्रमातृताऽभावे । अस्याश्चैव प्रमाणप्रवृत्तिनिचयोपपत्तिरपि न स्यात् ॥ २५ ॥ इन्द्रियमनुपादाय व्यवहारो नापरोक्षमुख उदियात् । व्यापारोऽपिच खानां नेहाधिष्ठानमन्तरा सिध्येत् ॥२६॥ व्याम्रियते न च देहेनानध्यस्तात्मभावतः पुरुषः । न्यस्तेऽर्थेऽसति भविता नासङ्गस्यात्मनः प्रमातृत्वम् ॥ २७ ॥ उक्तान्येवमविद्यावद्विषयाण्यपि भवन्ति शास्त्राणि । प्रत्यक्षादिसमस्तप्रमाणवर्गाणि चेति तदवेहि ॥ २८ ॥ अविशेषाद्यत्पशुभिश्चार्थैः श्रोत्रादिकस्य संबन्धे । सत्यनुकूले ज्ञाने यान्त्यभिमुखमन्यथा निवर्तन्ते ॥ २९ ॥ संसारोऽयं सत्यः संलग्नः स्वात्मनीति विभ्रान्तिः । येयमविद्या नात्मन आभासस्यैव संसृतिस्त्वपितु ॥ ३० ॥ एतद्विविच्य वस्तुस्वरूपधारणमिहोदिता विद्या । आभासस्य हि सिद्धाः सप्तावस्था इमा निरुच्यन्ते[1] ॥ ३१ ॥ अज्ञानमेकमपराऽऽवरणाह्वयाऽन्या भ्रान्तिः परोक्षविदितं त्वपरोक्षबोधः । अन्यः शुचाविलय एव परोऽतिहर्ष एता दशा 'भवत आसु हि बन्धमोक्षौ' ॥ ३२ ॥ पूर्वं स्मृता मनुजबन्धकृतस्तु तिस्र उक्ताश्चतस्र इह मुक्तिकृतश्च पश्चात् । इक्प्रागभावसहितं प्रवदन्ति मूलमज्ञानमेव नहि वेद्यहमित्यमुष्य ॥ ३३ ॥ गत्वाऽपथेन बहुधा विपरीतभावान्नह्यस्ति न स्फु-

१ निगद्यन्ते । पा० ॥ २ वृतिनामिका । पा० ॥

Digitized by Google

रति चेति यदाह तत्वम् । तच्चाहतं विदुरिहावृतिकार्यमार्या विक्षेपमेतमपि देहयुगानुबद्धम् ॥ ३४ ॥ आभासमेष नियतं खलु बन्धकोऽस्य कर्तृत्वमेव सुखदुःखनिबन्धनं च । ज्ञानद्वयेन लयमेष्यति सा क्रमेणासत्त्वावृतिः पुनरभानपदोदिता च ॥ ३५ ॥ नष्टेत्वभानमुख आवरणे स्वजीवत्वारोपनाशनवशाद्विलयं प्रयाति । कर्तृत्वमुख्यसमशोक इहैव संसाराख्यस्ततः परमुदेत्यतिहर्ष उक्तः ॥ ३६ ॥ यद्वत्त्वमेव दशमो भवसीति वाक्यात्स्वात्मन्युदेति धिषणा त्वपरोक्षनाम्नी । तद्वद्विविच्य शतशो विधृतेऽयमात्मा ब्रह्मेत्यथर्वणगिरोऽर्थं उपैति सिद्धिम् ॥ ३७ ॥ जाग्रत्काले संविदो गोचरा ये शब्दस्पर्शाद्यास्तथाऽऽकाशमुख्याः । भिद्यन्ते वैचित्र्यतोऽन्योन्यमेते संविन्मात्रं भिद्यते नैकरूप्यात् ॥ ३८ ॥ एवं स्वप्ने स्थायि नो वस्तु वेद्यं जाग्रद्वेद्यं स्याय्यतस्तद्विदाऽपि । संविद्वेदो न स्मृतः सैकरूपा सुप्तोत्थानं कुर्वतः पूरुषस्य ॥ ३९ ॥ यः सौषुप्ताज्ञानबोधः स्मृतिः स्यात्सेयं प्रोक्ताऽनानुभूतार्थरूपा । तस्माद्वेद्यं तत्तमश्चावबुद्धं सम्यक्काले स्वाप्यये बोध एषः ॥ ४० ॥ अर्थाद्भिन्नो नैव बोधात्कथञ्चित्स्वप्नज्ञानं वा तदेवं भवेत्सा । संवित्तिस्थानेऽपि च स्वप्नभैका काले कस्मिंश्चिन्न हानिर्न वृद्धिः ॥ ४१ ॥ सेयं संवित्परमानन्द आत्मा परप्रेमास्पदमित्युच्यते यत् । अहं मा भूवं न भूयासमेवं प्रेमाऽऽत्मन्युद्वीक्ष्यते सार्व एषः ॥ ४२ ॥ तत्प्रेमात्मार्थं भवेत्स्वातिरिक्ते नान्यार्थं तद्भविता स्वात्मनीदम् । तस्मात्तत्स्यात्परमं तेन नित्यात्मन उक्तैवं परमानन्दताऽस्य ॥ ४३ ॥ अनुगतं समवस्तुषु यत्परं निरपवादमिदं सदवेहि तत् । अधिगते सति तत्पद उच्चकैस्त्यज मृषाजगदस्तिपदाश्रितम् ॥ ४४ ॥ तदनुशिष्टमहंपदलक्षितं स्वयमहं तदिति त्ववधारय । सदधिरोपितवस्तु तदात्मना विलयमेति मरौ दकं[3]धीर्यथा ॥ ४५ ॥ यदिह चित्तमुखेन्द्रियसन्ततिव्यवहतावुदितं परकारणम् । निरुपधीतिवचोऽतिगमाश्रयं तदवधारय निर्भयमों

---

१ स्थिरम् ॥ २ इव ॥ ३ जलभ्रान्तिः ॥

Digitized by Google

स्वयम् ॥ ४६ ॥ वियदिवाधिकपूर्णमशेषहृत्स्थितमनन्तमनामयमद्वयम् । यदुपदिष्टमिव श्रुतिमस्तकैस्तदव०,, ॥ ४७ ॥ यदनुभाति महोनिकुरंबकं रविशशिप्रमुखं यदलेपकं । वशकुशाग्रमनोविदितात्मकं तदव०,, ॥४८॥ यत इदं निखिलं मतमंशुवत्पट इवाभरणं कनकादिके । यदनुविद्धजडं स्फुरतीव च तदव०,, ॥ ४९ ॥ इति धृता मतिरप्यचलेऽव्यये निरभिमानबलेन विधूय च । सदसदाशयजालमियाल्लयं कतकधूलिरिवांबुनि खात्मना ॥ ५० ॥ धृतिमिमां न गुरोः करुणां विना क्वचिदुपैति पुमानपि कश्चन । चिदुपसत्तिवशादुदयत्सावितिं विभुं हृदयेशमनुव्रजेत् ॥ ५१ ॥ अपि दविष्ठमिहेशकृपालवः सपदि नेदीयति स्वैचिदास्थितम् । यदि कृपाऽस्य भवेन्नहि दुर्लभं क्वचन किञ्चन सोंतदुपास्यताम् ॥ ५२ ॥ प्रणवरूपपरात्मविभावनादज इयात्स्ववशंवदतां लघु । विभुनमस्क्रियया सहजा भवेदिति पतञ्जलिराह न तन्मृषा॥५३॥ हरिः ॥ शिशुसमाख्यमुनीन्द्रपदाम्बुजद्युतमरन्दझरीपविताङ्कुरा । असितकण्ठपदाङ्कितनिर्मिताऽमृतलता जयताद्विधुपादगा ॥ ५४ ॥ ओं तत्सत् ॥ शान्तिः ॥

इत्यमृत(कल्प)लता समाप्ता ॥

कालीपञ्चकम्

हरिः । ॐ ॥ श्रुत्वामातृर्निलीनाः सुरमुनिवचनात्स्वावमानं च सम्यक्कुप्यत्कालाग्निरुद्रात्मकहरनिटिलाक्ष्युत्थिता भैरवी या । ब्रह्माण्डव्याप्तदेहा भिदुरकरसहस्राधिका घोररूपा कण्ठेकाली सदा सा वितरतु करुणार्द्रान्तरात्मा शिवं मे ॥ १ ॥ लब्ध्वाऽजाज्ञां करीतुं दनुजकुलपतिं दारुकं वाहनार्थं वेताल्यै संप्रतिज्ञाय च रुधिरमयीं शीधुमेनां प्रगृह्य । सार्धं षण्मातृभिर्या हृतकरिपुपुरं द्रागवाप क्षिभीमा कण्ठेकाली० ॥ २ ॥ युद्धे या ब्रह्मदण्डं विसृ-

---

१ तेजःसमूहः ॥ २ ब्रह्मस्वरूपेण ॥ ३ समीपस्थं करोति ॥ ४ स्वरूपावस्थानमिति भावः ॥

Digitized by Google

जति दनुजाधीश्वरे दारुकाख्ये ब्रह्माणी ब्रह्मणोऽर्ध्याऽस्त्विति समरतलात्सन्निवर्त्य स्वमाता । याचित्वाऽऽप्यास्य पत्न्या मनुयुगममुना दण्डतस्तत्प्रयोक्त्री कण्ठेकाली० ॥ ३ ॥ भीत्या पातालमीतासुरवरपथमाकाशवाचाऽवबुध्वा सिष्णासू रक्तपूरे भुवनमपि रविं जिह्वया कैशिकैश्च । या स्थित्वाऽऽच्छाद्य रात्रीत्युपरि गतममुं प्राक्षिपद्व्योम्नि वाण्या कण्ठेकाली० ॥ ४ ॥ शूलाग्रेकृत्य खात्प्राप्य च भुवि तरसाऽऽविध्य तद्वत्समुच्चै रक्ताक्ताङ्गाऽभवद्यापुरदमथितुरात्मोद्भवाऽभीतिदात्री यामस्तौष्टेन्द्रमुख्यस्त्विह जनकगिरोऽस्मान्सुखं पाति येत्थं कण्ठेकाली० ॥ ५ ॥ पञ्चकं भद्रकाल्या यः पठेदिदमनुत्तमम् । नैलकण्ठं तस्य भयं न भवेत्क्वचिदपि च ॥ ६ ॥

इति स्तुतिमुक्तालतान्तर्गतं कालीपञ्चकं समाप्तम् ॥

हरिः । यमवाप्य समागमैकमुष्टिन्धयमद्वैतधुरंधरं दुरापम् । नवजेजननिर्व्यवर्त्म कश्चिच्छिशुनामाऽवतु मां स पूज्यपादः ॥ १ ॥ य इलाङ्गणजाङ्घिकान्तवासिप्रभृतीनां कलिकालिकं भयं घ्नन् । प्रणियच्छति सत्यबुद्धिमेकः शिशु० ॥ २ ॥ करुणावरुणालयं यमाहुर्गुटिकासिद्धिमुखस्य चैकवस्त्यम् । अपि चिद्युसदं गिरीन्द्रसंस्थं शिशु० ॥ ३ ॥ इह पक्ष्मिमया तपस्यथैकः करसंस्थामलकीफलाविभेदम् । उपदेक्ष्यति यः परात्मनिष्ठां शिशु० ॥ ४ ॥ निशि चात्तभवत्युपारतेऽन्तर्दृशि यस्मिन्निजकुण्डिकापहारी । न पदं चलितुं स्वयं शशाक शिशु० ॥ ५ ॥ किमिदं बहुभूतिकस्य वाग्रे नहि शंशक्ष्यत एव कश्चनेति । विपरीततया प्रवर्तितुं च शिशु० ॥ ६ ॥ सहजामृतधारयाऽभिवृष्टं यमिनां यो विदधाति चित्तवप्रम् । निजबोधसमाख्यबीजवाप्यं शिशु० ॥ ७ ॥ शिशुसंज्ञमुनीन्द्रसप्तरत्नं तदतीताङ्घ्रिसरोजषट्पदेन । असितादिककन्धरेण भक्त्या रचितं यः पठतीह मुच्यतेऽसौ ॥ ८ ॥ इति श्रीमदाराध्यपादसप्तकंस०

Digitized by Google

ओम् । अङ्गादङ्गात्संभवसीति श्रुतिवाक्यान्मन्ये शंभोरङ्गभवं यं शिवमेव । रक्षार्थं नः स्वीकृतदिव्यामलरूपं घण्टाकर्णं तं हृद्यान्तर्विभृशामि ॥ १ ॥ जाते यस्मिन्कालिमसूरी शममेति स्मारं घोरं नीरुजमाद्यं रविभासम् । सेवित्वा यं ना सुखमीयादतिमात्रं घण्टा० ॥ २ ॥ त्रैलोक्यं यद्भ्रूवशवर्ति प्रणिधिर्यो भर्गस्यान्तर्ज्योतिरुदारः करुणाब्धिः । योगैः शून्ये यः परिदृष्टः सहजातो घण्टा० ॥ ३ ॥ यद्भक्तानां नैव वसन्तामयपीडा नृणां लोके शोकविनाशस्त्वपि यस्मात् । चञ्चूर्यन्ते यं परितोजं मुनयोऽपि घण्टा० ॥ ४ ॥ यद्दृष्ट्यात्रायत्तमिहत्याद्वयवित्तिर्यं नामं नामं नाऽसम्मितमयते शम् । यस्मिन्रक्षा नो निहिता शंकररूपे घण्टा० ॥ ५ ॥ अर्भाख्यमुनिभृत्यश्रीकण्ठेकालाभिधोदितम् । पञ्चकं यः पठेदेतन्नेह तस्य भयंभवेत् ॥ ६ ॥ इति घण्टाकर्णपञ्चकं समाप्तम् ॥

इति श्रीनीलकण्ठगुरुकृता योगामृततरङ्गिणी समाप्ता ॥


Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google





Digitized by Google

IndL 2800.608
Widener Library 003578535
3 2044 092 182 153

Digitized by Google

Ind L
2800
608B

The Yôgâmritataraṅgiṇî

Digitized by Google

7dL 2800.608.B



Harvard College
Library

THE BEQUEST OF

Charles R. Lanman

PROFESSOR OF SANSKRIT
1880–1926

Digitized by Google

Presented by Prof. C. R. Lanman
with the compliments of the author

THE

YÔGÂMṚITATARANGIṆÎ

OF

SRÎ-NÎLAKAṆṬATÎRTHA.

श्रीनीलकण्ठतीर्थकृता

योगामृततरङ्गिणी ।

मुंबय्यां


निर्णयसागरमुद्रणयन्त्रालये मुद्रापिता ।

Digitized by Google

"सदानंदयतीन्द्रांघ्रिसरोज इदमर्पितम् ।
मङ्गलानन्ददेव्या तच्छिष्टयाऽधिकभक्तितः ॥"

Digitized by Google

Digitized by Google



श्रीनीळकण्ठतीर्थ.

Digitized by Google

THE

YÔGÂMṚITATARANGIṆÎ

OF

SRÎ-NÎLAKAṆṬATÎRTHA.

EDITED BY

PANDITAVAR KRISHNA SHASTRI.

PUBLISHED BY

SRÎ MANGAḶÂNANDA DEVÎ.

PRINTED AT JAVAJI DADAJI'S "NIRNAYA-SAGAR" PRESS.

1904.

Digitized by Google

IndL 2800.608
B
HARVARD COLLEGE LIBRARY
FROM THE ESTATE OF
CHARLES ROCKWELL LANMAN
MARCH 15, 1941

F

Digitized by Google

श्रीनीलकण्ठतीर्थकृता

योगामृततरङ्गिणी ।



इदं पुस्तकं

विद्वन्मूर्धन्य० परवूर्० वि० कृष्णशास्त्रिद्वारा

संशोध्य

श्रीमत्सदानन्दस्वामिपादालुब्धनिष्ठाकया तथा एत-

ग्रन्थकर्तुः सकाशादधिगतात्मविद्याकया

श्रीमंगलानंददेव्या

मुंबय्यां

निर्णयसागरमुद्रणयन्त्रालये मुद्रापिता ।

खीस्ताब्दाः १९०४.

Digitized by Google

योगामृततरङ्गिण्यनुक्रमणिका



१–हरिभजनामृतम्–

२–विधुनवसुधाझरी–

३–हरिपञ्चकम्.

४–विधुस्तवमधुद्रवः–

५–स्वात्मसुधाकरः–

६–योगमञ्जरी–

७–अमृतलता.

८–कालीपञ्चकम्.

९–घण्टाकर्णपञ्चकम्.


१०–आ० पा० सप्तकम्–

---

१ योगशब्देन "भक्तिज्ञानयोगाः" संगृह्यन्ते.

Digitized by Google

श्रीहरिभजनामृतम् ।



श्रीहरिः सर्वम् ॥ ओम् ॥ श्रीमन्नारायणपदतलद्वन्द्वमद्वन्द्वकन्दं सर्वोत्कृष्टं खन मतिवराहात्मना चानुभुङ्क्ष्व । एवंकारे भवसि हि सुखी नित्यतृप्तत्वमीतो यत्राद्याच्यां सफलय ततः पूर्णकामोऽप्यहं स्याम् ॥ १ ॥ तूष्णींभावं विभुपदमितो वर्तितुं मारसोतर्वर्ष्टयेषो-ऽङ्गालिकनयनसेव्याव विष्णो तदेनम् । त्वद्धामैत्यैति न पुनरतो देहमित्यूचिषे यद्गीतायां वज्र्युपलसुभगंभावुकाभोगंभोग ॥ २ ॥ साक्षाद्रष्टा त्वमिति सकलस्यापि साक्षीति वित्तैः सत्येवं सज्जनगणि-मिंहेड्भो कृथा मा वृथाज । मामुद्धर्तुं प्रतिनवसुधाह्लादिनेत्राञ्चलेन त्वं जन्मान्धोर्यसेंकरुणया त्वां प्रपद्ये तदेकम् ॥ ३ ॥ श्रीकृष्णस्मृत्य-पचितिकृते चूर्णपेषं पिनष्टि स्वाच्छन्द्येनाशयकथितबीजं कृती यः स एषः । इत्यालोच्य प्रकृतजननोपक्रमं सेव्यते यो दूर्वाकाण्डप्रति-निधिरुचिर्मा स्वभू रक्षतात्सः ॥ ४ ॥ मायामात्रं तव वपुरिति ज्ञायते गोपते यत्तन्नाकृष्टं भवतु भगवद्विष्ण्यतो दर्शयान्यत् । अन्वर्थं कुर्व-ज निरुपमं नाम मायीति पश्चात्कार्यं जाने वचनविरतं युज्यते लिप्सितं यत् ॥ ५ ॥ ब्रह्मीभूय त्वयि तनुलये ज्ञानवान्निर्विभागे संविद्रूपे सपदि विलयं याति कैवल्यकन्द । विष्णोरैक्यं त्वजे नि-धिनिधायं निद्ध्य स्थितोऽयं यत्तद्रक्ष प्रणतहृदयाकूतकल्पद्रुकल्प ॥६॥ पौरम्यं ते निबिडसहजानन्दसन्दोहदायिन्साक्षात्कर्तुं खननमु-दितं यत्त्वयाऽगाधबोध । उत्खातुं हृद्भुवमयमपास्योपलं देहसंज्ञं

---

१ ईतो=गतः ॥ इण्–गतौ ॥ २ तूष्णींभूय ॥ ३ मारसोतः=कामजनक । षु–प्रसवैश्वर्ययोरित्यस्मात्तृच् ॥ ४ आशास्तेऽर्थयते वष्टि । इति भट्टमल्लः ॥ ५ वज्र्युपलः=इन्द्रनीलमणिः ॥ ६ भोगः=शरीरम् ॥ ७ ज्ञातः ॥ ८ गर्णि= गणनम् ॥ ९ इट्–ईश ॥ १० यसु–प्रयत्ने ॥ ११ चूर्णवत्पिनष्टि, शुष्कचूर्णेत्यादिना पिषेर्णमुल् ॥ १२ निधिवन्निधाय (निधि निधायम्) ॥ १३ परमत्वं, श्रेष्ठयम् ॥

Digitized by Google

धीकुहालैर्यसति तदिमं धारय स्वे महिम्नि ॥ ७ ॥ उद्बुद्धेश्वर्युपकृति-दलचक्रजालेषु चिष्णुं कृत्वा मूलादिषु विधुसुधाधोरणीदिग्धगात्रम् । सन्दध्यां त्वां मयि कुरु कृपां तत्सुरद्विड्विकाषिन्भूयात्प्रत्यक्षितहरिपदोऽयं त्विंयत्ताविहीन ॥ ८ ॥ सामञ्जस्यं भजति नहि ते भेदहृद्यादशेषु त्वन्नाथेषु स्फुरणसुखमात्रात्मक श्रीनिवास । इत्यस्मान्मां प्रबलकरुणाधिष्ठितः सन्प्रपाया: प्रह्लादं वा प्रेंकृतिमृदुलं त्वल्पदं धारयेयम् ॥ ९ ॥ श्रीमद्विष्णोरमलचरितान्येव सेवेत नान्ध्याद्यावत्तावत्सुखमृतसून्यत्र दुःखी य एषः । श्रुत्या युक्त्याऽप्यनुभवबलेनाच्युतं यत्सदाऽहं वेद्म्यात्मत्वेन तु करुणया मे क्रिया नित्यसौख्यम् ॥ १० ॥ कर्तुं मेऽनुग्रहमुपनिषन्मात्रगम्ये विभौ मन्नैजानन्दत्वत इह चिकूंप्सत्यहं तद्विवेक्तुम् । शक्तो न स्यामपि च भगवन्नो मया रुद्यते तत्काले तस्मादिममव सदानन्दसान्द्रस्वरूप ॥ ११ ॥ कार्याकार्यद्वयविनिमयं यद्बुद्धुताकरोस्त्वं भृत्यार्थे तत्तव करुणया ज्ञातमेतेन भूमन् । र्यस्यत्वस्माञ्जिजचरणदासं भवान्मांऽवितुं यत्सर्वेत्याद्यां शरणमयते त्वद्गिरां सर्वथाऽयम् ॥ १२ ॥ भक्त्या यद्यत्कृतमभिहितं तत्तदिष्टयै तवेति स्तौमि त्वां नो चैंरित इह संनह्यते बालिशेन । जायन्तेयादिकमुनिगिरा बुध्यतेऽशक्यताऽत्र श्रीवैकुण्ठेश्वर दनुजहन्मे प्रसीद प्रसीद ॥ १३ ॥ चित्ताम्भोजे मम चिरमटाट्यां कुरुष्वाच्युत त्वं का हानिस्तत्कठिनमिति किं गोपिकानां चैं नास्य । योगाभ्यासादपि तु मसृणं पश्य पश्यात्मयोने नत्वाष्टाङ्गैः पृणैंति तदयं मा विलंबस्व लेशम् ॥ १४ ॥ कश्चित्स्निग्धाञ्जनगिरिसमं त्वां गृणातीह तद्वच्चन्द्राङ्कश्रीमुषमितर एकः कलायाभिरामम् । देव त्वाऽन्यः कवयति घनाभं

---

१ उद्बुद्धेश्वरी=प्रबुद्धशक्तिः ॥ २ परम्परा ॥ ३ अप्रमेय । (अपरिच्छेद्य) ॥ ४ वा=इव ॥ ५ स्वभावकोमलम् ॥ ६ अमृतं सुवत इत्यमृतसूनि । षूङ्–प्राणिगर्भविमोचने ॥ ७ परिणन्तु मिच्छति ॥ ८ यसु–प्रयत्ने ॥ ९ मा=माम् ॥ १० महिमगणने नह्यते । पा० ॥ ११ अटनम् ॥ १२ व=इव । वं प्रचेतसि जानीयादिवार्थे तु तदव्ययम् । इति कोशः ॥ १३ पृण–तर्पणे, अग्निं पृणाति पृणति द्विजदेवतांश्च । इति कविरहस्यम् ॥

Digitized by Google

परो नीलकंठग्रीवाप्रख्यं परमनुपमं सोऽयमीश प्रसीद ॥ १५ ॥ नीलग्रीवोपमितिकथनं मामकाख्याश्रुतौ ते ध्याकारः स्यान्मम विषयको नैलकंठाह्वगंधात्। इत्येव श्रीकैमन न भवानन्यथा चिन्तयेन्मां यत्कल्याणात्मकपरशिवध्यानधिष्ण्यामलात्मन् ॥ १६ ॥ कैवल्याख्यां सुखकणकरालां समाप्यैष संस्थां नैर्चेङ्क्ष्यः स्वभुवमयमित्यात्मनाथो भवान्किम्। तूष्णीमास्ते वदतु भगवांस्तन्निदानं चिकित्सां कुर्यां विष्णोः परकरुणया नो विलंबं सहेऽहम् ॥ १७ ॥ जाने शार्ङ्गिन्न खलु भवतोऽकिंपचानाशयं यज्ज्ञानेऽभीष्टां रचयितुमहो शक्नुयां कारिकां ते। अग्रे भूत्वा वद करुणया तत्कथञ्चिद्यतिष्ये भक्त्याऽहं सोऽनपरशरणो मे प्रसीद प्रसीद ॥ १८ ॥ भो भोः शौरे मम शिरसि सदभ्रुक् क्षिपाकार्मणं ते हस्तं कृत्वा शमय भगवन्हृद्रुजं त्वां प्रणौमि। भूयो भूयो नतिमपि किरन्नैन्दवस्रेर विष्णो नातोऽन्यस्ै प्रभवति जडोऽभीष्टसन्तानशाखिन् ॥ १९ ॥ कोऽन्यो माऽवेद्विधुपदसरोजातनिष्यन्दमाध्वीगृध्यद्भृङ्गं वद वद हरे श्रेयमाहो ममैकम्। सर्वेशत्वक्षतिकरमिदं मा वचो वोच विष्णो किन्त्वेनं भोः प्रणतशरण त्वं प्रपाया मुकुन्द ॥ २० ॥ वार्चाराद्धत्रिभुवनपतिर्मे क्षितस्यार्थ ईट्टे विष्णुं नान्यं कवत इह भो त्वत्स्मृतेस्संस्कृतायुः। तत्त्वं कूलंकषकरुणयाऽऽघूर्णितान्तर्गिरिः सन्कुर्या नोऽनुग्रहमजगतिस्त्वां विना कुत्रचिन्न ॥ २१ ॥ नैवात्मा च प्रिय इति भवान्यत्त्वभाणीत्स्वभृत्यं बार्हस्पत्यं स इव भगवंस्तन्मृषा वा न भक्तिः। किंवा मेऽस्य प्रविश हृदयं शोधयार्द्रं न चेत्तत्कारी रुध्याऽस्त्वज तव तदानन्ददीप प्रसीद ॥ २२ ॥ देवः कृष्णायत इति नहि क्वापि कोऽपि स्वभृत्यप्रेमावेशात्स्वकमहिमसंप्रापणे यत्ततोऽहम्। लंभं लंभं रमतिजनकामोदमेनं

---

१ रमाकामुक ॥ २ सौख्यलवतुल्याम् ॥ ३ ऋच–स्तुतौ ॥ ४ अक्षुद्राभिप्रायम् ॥ ५ क्रियाम्। ण्वुत् ॥ ६ सदूद्रोहिक्षिपाकर्मठम्। (कार्मणः कर्मणि कुशल; अण्॥) ७ लुभ्यद्भ्रमरम् ॥ ८ वाक्॥ ब्रह्माणी वचनं वाचा। इति कोशः॥ ९ क्षीणस्य ॥ १० ईड–स्तुतौ, अदा० आ० प॥ ११ कारिः= क्रिया॥ १२ इष्टा॥ १३ लब्ध्वा लब्ध्वा ॥ १४ रमतिः=कामः(औणादिकः)।

Digitized by Google

नुवंस्त्वां नामं नामं दिवसगमने बद्धबुद्धिर्भवामि ॥ २३ ॥ त्वद्बद्धात्माऽस्म्यजय भरिमासक्तिमुत्सार्य विष्णो न स्थेयान्मे मतिरिति सकृद्वस्तुयुग्मे मुरारे । कालोऽयं मां सुखयितुमिदानीं तवेहाद्वयात्मन्नौदास्यं चेद्भवति विफला गीत्युदीता प्रतिज्ञा ॥२४॥ हन्मौढर्यं ननु रुजति मे त्वन्निविष्टं व्यथाख्यो हिंसीरस्तं जहि सुखय भो माऽतिदुर्लभरूप । वेलालंघिप्रतरलसुधांस्तिभिगंभीरि-माऽथो भूयादस्येत्यज विवरग त्वां विना कुत्रचिन्न ॥ २५ ॥ वैकुण्ठेक्षासुरभिरयथास्थित्यमानस्यतृण्यां तर्णोत्वस्य , प्रदिशतु तथाऽऽनन्दसन्तानबन्धुम् । तत्ते सौख्यप्रसविपदयंयम्यमानान्त-रंगो हे विष्णो त्वां निखिलजनहृत्साक्षिरूपं भजामि ॥ २६ ॥ विध्वंच्युत्था सुरपुरश्चरीस्त्वर्वधूकेशवेशभ्रश्यन्मैन्दारकसुरभिला विष्णुपत्प्रापिरज्जुः । जातेहत्यान्पवत इति यन्नात्र चित्रीयते तत्त्वन्माहात्म्यं गणनविषयं नेति हे स्वारतीड्य ॥ २७ ॥ लीला-मूर्तिग्रहणमिह ते मादृशत्राणमेकं हेतूकृत्य प्रकृतमिति सन्निश्रयः किं न तद्वत् । ओङ्कारं वा श्रवणविषयीकुर्वथो नेति वाचं वन्देऽहं त्वां जननहर जञ्जन्यमानादरेण ॥ २८ ॥ भासन्तान्तःपुरुषमुपतिष्ठे हरिं दीप्रमुषैर्भानुर्यद्धाय्युपगमविधौ राजमार्गायते हि । अस्मात्त्व-त्प्रीत्युदयजनकं नास्ति यत्तन्मुरारे पूर्णानन्दं वितर भगवन्दासमेनं प्रपाहि ॥ २९ ॥ हस्तग्राहं चरणकमलं वैधवं मानसाख्ये कासारेऽ-स्य क्षिपतु भगवन्नष्टिराहो भवेत्का । तेनायं स्यात्परमसुकृती निश्चयेन त्रिधन्यस्तस्माद्याच्ञां मम सफलयन्देह्यनुज्ञां नमस्ते ॥३०॥ हरिः ॥ शिशुसंज्ञमुनीन्द्रपादपीठायितमूर्ध्नाऽसितकन्धरेण सूक्तम् । मुरभिद्भजनामृतं हृदन्तः कुरुते यः स समासकाम उक्तः ॥ ३१॥

॥ इति हरिभजनामृतं समाप्तम् ॥

---

१ भरिमा=कुटुंबम् ॥ २ मनोमुनिम् ।(गर्गादित्वान्माठर्यः)॥ ३ दुष्टः॥ ४ स्तिभिः=समुद्रः ॥ ५ अमानस्यं कृच्छ्रकष्टम् इति कोशः ॥ ६ तृणु-भक्षणे ॥ ७ कल्पोद्भवेति । पा० ॥ ८ भासन्तः सूर्यः ॥ ९ नष्टिर्नाशः ॥

Digitized by Google

अथ विधुनवसुधाझरीप्रारभ्यते ।

हरिः ॥ कल्याणं वितरतु शौरिवाङ्मृदीष्णायैतस्मै प्रणतभवार्दनो हयास्यः । यत्प्रीत्याऽपर इव गीष्पतिर्भवेत्सोऽप्येकान्तेन हि लघु किम्पचानवाग्यः ॥ १ ॥ स्वत्वेनाच्युतमनुभूय मुक्तिसौधं त्वारोढुं मम चपलाधवांघ्रिसेवा । निःश्रेणीभवतु सदेति कामितास्मिन्कल्पांघ्रिपमजमन्वहं प्रपद्ये ॥ २ ॥ सिष्णासुर्विधुकरुणामृतोदराशावस्म्यङ्ग स्वजनैर्भियाऽद्रिभिद्रूप । यद्विष्णो र्भरणिसमुत्थदुःसहार्चिर्निस्तप्तः स्वयमपि नित्यभक्त एषः ॥ ३ ॥ संभूतं मधुमथनास्य दुःखपङ्कं नासाद्वार्द्धयँसमिवाशु पाह्यतो माम् । नो याप्योऽमृतकरुणैष काल ऐदम्पर्यं यद्भवतु न तद्वचोऽतिभूस्थ ॥ ४ ॥ विष्णो त्वद्विहरणयोग्यमास्तृणीय स्वान्तांभोरुहि तलिमं ममैष वृत्या । भोगीन्द्रप्रतिकृतिकं विधित्सुरन्तः स्थित्वा मामवतु भवान्नतीशसोतः ॥ ५ ॥ आपीयाच्युत तव कीर्तनानि साक्षादैकात्म्यप्रसविसमाधिवारिसुन्ति । अस्यान्तःकरणसमाख्यचातको मे नो मांक्षेद्विषयविषांब्वतोऽव माऽज ॥ ६ ॥ शार्ङ्गिंस्तेऽक्षयकरुणाकटाक्षधारा स्वर्णद्या मयि सहपाठवीथिमेतु । श्रीकंठाह्वय इति चैष तत्कृतेऽहं विध्वर्हा दध उरुगीत ते समर्चाम् ॥ ७ ॥ शोणांभोरुहसखमक्षि तेऽज भूयात्कारुण्याभिधमकरन्दबिन्दुसान्द्रम् । यत्स्वादे हृदयमधुव्रतो मदीयो विष्णो स्थाश्वनुभविता सुखं सदैव ॥ ८ ॥ स्वेक्षाऽऽयँलुककृशितान्तरङ्ग एष त्वां सेवेऽच्युत करुणातरङ्गिताक्षम् । तद्देवोद्धर पर मानसैणशावं बाधान्धोर्मम नवमेघगोत्रगात्र ॥ ९ ॥ वैदेहीहृदयँरुहप्रलीनकालेयारक्तोरसि तव नादधा गुहं

---

१ क्षुद्रगिरा ॥ २ चपला कमला लक्ष्मीरिति विश्वः ॥ ३ प्राग्रूपं विधुमहमन्वहमिति पा० ॥ ४ भयं भियेति शब्दार्णवः ॥ ५ भिद्रं वज्रम् ॥ ६ अरणिः=सूर्यः ॥ ७ परिमाणे द्वयसच् ॥ ८ विस्तारयेयम् ॥ ९ तलिमं कुट्टिमे तल्प इति र० मा० ॥ १० माक्षि—काङ्क्षायाम् ॥ ११ आहारो भोजनं स्वाद इति हलायुधः ॥ १२ आयलुकमुत्कण्ठा । इति यादवः ॥ १३ हृदयं चित्तवक्षसोरिति कोशः ॥

Digitized by Google

किम् । कारुण्यात्तदिति न च प्रयोजनार्थं शङ्के तत्कुरु कृपयेममेवमेव ॥ १० ॥ चिन्मुद्राविवृतनिजस्वभावदार्ढ्यं कर्तुं मां भवतु कृपार्द्रदृष्टिपातः । श्रीश त्वां शमथधनांतरञ्जभृंगं सौषुम्ने पथि विधिवत्समर्हयामि ॥ ११ ॥ श्रीशेक्षार्बुदतयजानुकूल्यवार्वेष्टथा-बाधाकषितकषायितान्तरंगम् । संस्कर्तुं जनिहर सैष तत्प्रसन्नस्त्वं विष्णो वितर तवानतिं दधाति ॥ १२ ॥ उद्यत्कोट्यरुणरुचिच्छटं किरीटं माणिक्याकरपरिपन्थिनं स्मरामि । हृद्यन्तर्नरकविनाशनस्य विष्णोः सङ्कीर्णालकमलिकं च सर्वकालम् ॥ १३ ॥ भ्रूयुग्मं मदनशरासनप्रतीपं चाकोराक्ष्यरुणिमदायिनेत्रशोभि । कुर्वेऽन्तस्तिलसुमगर्वचर्विनेस्यां चैवं संसृतिदवदावरूप विष्णो ॥ १४ ॥ चित्ताब्जे मम मधुमत्प्रवालशोभालुण्टाकाधर उदितः सदा चकास्तु । तद्गण्डोपलमुकुरप्रविष्टकर्णोत्तंसश्रीमकरमहामणिद्वयं च ॥ १५ ॥ वैकुण्ठेशय तव यत्स्मितस्य साक्षादैत्कौमुद्वतसितिमेव पूर्वकोटिम् । एषोऽहं परिकलयामि हास्यमेनत्तन्मन्दारकगुणकारि सर्वदैवम् ॥ १६ ॥ सत्कण्ठोदित तव कण्ठलग्नमालां धत्तेऽयं हृदि सँपतीयते श्रियो या । विष्णो कुंस्तुभभवमण्युदारवत्सं श्रीवत्सेन च सह नित्यसौख्यवृत्यै ॥ १७ ॥ दौर्भाग्यासुरकभुजिक्रियाचणांस्ते वज्रोग्रान्मम मनसा कराम्स्मरामि । हे विष्णो प्रलयदिनेशदीप्रचक्राब्जाम्भोजोद्भटगदिकाधरान्मुरारे ॥ १८ ॥ याह्यन्तर्भ्रमर मुकुन्दनाभिपद्मं यन्माध्वीं रिरसयिषत्यहो अजाली । तत्पीतांबरभवमेव तत्र तेजः सान्ध्यं नाण्वपि विहरान्वहं यथेच्छम् ॥ १९ ॥ ऊरुं ते मुरहर हस्तिशावहस्ताग्राकर्णेजपमनुसन्दधामि विष्णो । कैवल्यप्रद परिभूतकूर्मराजं चेत्थं ते प्रपदमजाव मां कृपातः ॥ २० ॥ सन्तानप्रतिनवपल्लवाभिरामं विन्यस्याच्युत तव पादमस्य मूर्ध्नि । सन्तापं शमय कृपामृतं विकीर्य त्वामीशं शरणमितो व्रजामि चैकम् ॥ २१ ॥ स्निग्धेन्द्रोपलमधुरं स्वरूपमेकं हृद्यन्तः स्फुरतु

---

१ आबाधा वेदना दुःखमिति कोशः ॥ २ नसा नस्या च नासिका । इति कोशः ॥ ३ लुण्टाकश्चौरः ॥ ४ सपत्नीवाचरति ॥ ५ कुस्तुभः समुद्रः ॥

Digitized by Google

सदैव कैशवं[1] मे । आख्यंभावुकपदमेतु निर्विशंकं येनेदं मम मन ऐषमोऽब्धिशायिन् ॥ २२ ॥ कारुण्यात्तव भवदावपावकस्त्वक्लेष्वीण्मलयजपङ्कतीति बुध्या । तैत्तामेत्यतिलघु सोऽयमित्यहं त्वां भोः स्वामिन्रणरणकाशयः प्रणौमि ॥ २३ ॥ यम्यन्तःकरणग सौखेंसुप्तिकः[5] स्या व्रश्चित्वाऽसदृशनचंपचाऽमनस्यम् । सारल्यान्मम मधुसूदनैतदर्थं त्वामर्हाम्युपनिषदैककण्ठ्यगीत ॥ २४ ॥ भिद्योद्यप्रतिनिधि मय्यनन्त भूयात्कारुण्यं निगमशिरोरसप्रतिष्ठ। भक्तान्तःकरणचंकोरिचञ्चुकोट्यां भद्रश्रीमैंसृणरसीयतीश भो यत् ॥ २५ ॥ हे मासप्रमितसुधामयूखलेखालोभ्यात्मन्विश मम दृक्सृतिं मुकुन्द । चिद्योऽयच्युत गैहंनंसदीशसूनुं त्वां सोमामृतपरिषिक्तगात्रमीडे ॥ २६ ॥ निर्गत्वा चटचडितीश दृक्कुडंगात्पातङ्गी रुचिरज ते कृपाऽन्धकारम् । मोहाख्यं मम कवलीकरोतु विष्णो त्वां वाचंयमयमिवन्दथं प्रपद्ये ॥ २७ ॥ विष्णोस्तेऽकुटिलकटाक्षकामधेनोः पूर्णानुग्रहमयमेव मे प्रदाय । औधस्यं मम परिबृंहितायतीस्त्वं हे स्वामिन्कुरु सुखसन्ततीः प्रकामम्॥ २८ ॥ कारुण्यात्समममतिशेष इत्ययं मे हृत्पुंष्पधय इत ईश तेऽङ्घ्रिपद्मम् । तंद्धर्मं कुरु भगवन्विचारकृत्यामस्पृष्ट्वाऽमृतपिबचित्तचन्द्र विष्णो ॥ २९ ॥ त्वं तत्पायितभुजगेन्द्र पाहि माऽन्तर्नेत्रांधंकरणदराभिधानधूलिम् । धून्वंस्त्वाऽमृततटिनीं वगाह्यं पश्चादर्हां ते मुरहर निर्भिदं करिष्ये ॥ ३० ॥ हरिः ॥ श्रीबालनामभगवच्चरणारुणाब्जहंसायितासितगलाभिधनिर्मितां यः । विष्णुः

---

१ केशवस्येदं कैशवम् ॥ २ तस्य भावस्तत्ता ॥ ३ रणरणकमुत्कण्ठा ॥ ४ सुखसुप्तिं पृच्छतीति तथा ॥ ५ छित्वा ॥ ६ ड्यापोरित्यादिना ह्रस्वः ॥ ७ घुसृणेति पा० ॥ ८ मासं प्रमितो (मासप्रमितः) ॥ ९ दृक्पथम् ॥ १० देवराजानुजम् । सूनुः पुत्रेऽनुजे । इति विश्वः ॥ ११ लतागृहात् ॥ १२ (ऊधसि भवम्) पयः ॥ १३. प्रचितोत्तरकालाः (स्थिराः) इति षण्टापथः ॥ १४ भरणे पोषणे भर्म इति हैमः ॥ १५ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ॥

Digitized by Google

स्तवामृतझरीं कुरुते हृदन्तः सम्पूर्णकाम इह चैष मृतौ विभुः स्यात् ॥ ३१ ॥

इति विधुनवसुधाझरी समाप्ता ।

अथ श्रीहरिपञ्चकम् ।

ओं तत्सत् ॥ आमोदामृतवार्धिवीचिपृषतक्लिन्नं करोत्वन्तरं कर्णाकर्णिकयोपवर्णितपरात्मैक्यप्रतिष्ठस्य मे । योगोदञ्चितात्मदर्पणतले तेजो दरीदृश्यते यद्विष्णोः स रमेरितस्मितसुधासारावसेकेक्षणः ॥ १ ॥ मान्तर्मारसमाख्यबीजगमितस्याचार्यकं योऽदधिष्ठैष त्वं शतकोटिशारदशशांकामेक्षण श्रीपते ॥ पिंषन्हृद्दरसंज्वरं दिश शमेनं दन्दहीतीव यः कादाचित्कतया मुकुन्दपदकञ्जेन्दिन्दिरीभूतमीट् ॥ २ ॥ दुःसाधं मधुभिद्गुणानुगणनं यद्यप्यहं स्तौमि तं वाचालीकुरुते तदीयचरणश्रद्धापिशाचीति माम् । तस्मान्मेऽनुजिघृक्षयैव भवता भाव्यं मुरारेऽन्वहं नौदासीन्यवशंवदो भव कदाऽप्यद्वैतविद्याश्रय ॥ ३ ॥ मह्यं द्रुह्यति यस्त्वमुं सुखय इत्येतत्किमाचार्यकं तत्त्वं विस्मर भक्तरक्तिमबलाच्छंभोः सतीर्थ्यीकुरु । स्वं वर्तस्व ममानुकूल्यविधिना कारुण्यरिञ्छोलितः सत्क्षेपः सुशको न मेऽथ भगवन्रोरुच्यते वा न यत् ॥ ४ ॥ विष्णोऽन्तर्हरिणी ममाखुरलीकृत्सा व्यथाव्याधतस्तन्मां रक्ष समामराश्रुतचरं सौख्यं नियच्छंस्तु मे । शिष्टानुग्रहविष्टरस्थितमहं त्वां मे भ्रुवोरन्तरुज्ज्योतिर्दीपदृशिक्रियैकविषयं कुर्यां कृपाधूर्वह ॥ ५ ॥ शिश्वर्थनामकयमीन्द्रपदाब्जभृंगश्रीनीलकण्ठरचितं हरिपञ्चकं यः । संस्मृत्य विष्णुमखिलेश्वरमेव चित्ते भक्त्या पठेत्स भवितात्र समाप्तकामः ॥ ६ ॥

समाप्तमिदं हरिपञ्चकम् ॥

---

१ गमनस्य ॥ २ चूर्णयन् ॥ ३ अतिशयेन दहति ॥ ४ मुखरयति ॥ ५ सतीर्थ्यो भव त्वमिति पा० ॥ ६ रिञ्छोलिः स्रीततिश्छटेति कोशः ॥ ७ अभ्यासस्थानम् ॥

Digitized by Google

अथ विधुस्तवमधुद्रवः प्रारभ्यते ।

हरिः । हरिचरणसरोजचञ्चरीकान्तरंनिबिरीसतमो विधूय पायाः । प्रैंचिकटयिषुरेष संस्तवीति स्वभुवमिहोदितभक्तिमित्यजैनम् ॥ १ ॥ धरतु विधुरतिप्रकाशमन्तःकरणजैलेरुहि चेन्दिरापतीनः । नमदमरकिरीटरत्नदीपद्युतितपदाङ्कपरंपरः सदा मे ॥ २ ॥ नहि विदितमिदं कदा मदाधिं हरसि पुरीतदधीतसंस्तवस्त्वम् । अपि मतिबलतः करोमि तेऽर्हां मुरहर मा मयि भूरुदास्तवृत्तिः ॥ ३ ॥ मनुभुवननिवासिसम्मता शंकरमुखशङ्करता तवादिदेव । तदपि बत भवानिवार्तं आस्ते मम सुखने किमितीश नैव जाने ॥ ४ ॥ क्षतिरज भविता नु कैतदीयावनत इतीश बुभुत्सयाऽनुयोगम् । विधिनत विधिवत्प्रणम्य कुर्वे वद वद कालविलंबवर्जमेतत् ॥ ५ ॥ शरणमितमजं समात्मना चेद्रुजति दरोंऽभसि बंभ्रमीति चाश्मा । स्थित इति नरकस्य जिष्णुरन्तर्ज्वरहरणाय नहीहसे कुतो मे ॥६॥ तव पदतलयोर्लुठन्तमित्थं सहजकृपाभरलोलितान्तरस्त्वम् । रुदथमिममवाखिलैकतात त्वरिततरं दैवयंस्तु चित्ततापम् ॥ ७ ॥ मुरमथनमितो व्रजाम्यहं गोतमगृहिणी मुनिरुट्शिलीकृताऽपि । तदुपरिकृतयत्पदाब्जपांसुस्तुतिबलतः स्त्रितरा बभूव सद्यः ॥ ८ ॥

हरिः ॥ एतद्यस्मात्स्वप्नसदृक्षं जगदुत्थं संविद्रूपे संप्रति यस्मिन्स्थितिमेति । रज्जावध्यारोपितनेत्रश्रुतिवच्च लीयेतान्ते यत्र तमन्तः कलयेऽजम् ॥ १ ॥ श्रीकृष्णांघ्रिद्वंद्वसरोजे मधुधाराऽस्त्यन्तभृंग त्वं पिब नित्यं यतवृत्तिः । इत्थंकारं यापय कंचित्समयं वा तादृप्यान्मां पातु यथाऽजस्त्वयि लीने ॥ २ ॥ वारंवारं विष्णुमुदारं हृदयान्तर्धारंधारं तत्पदमेष्यत्यथमेवम् । धीध्वस्तान्यालोचन आस्ते यदज त्वं धेया धूस्तम्भं तदमुष्यावनरूपम् ॥ ३ ॥ ब्रूहि त्वं माऽनन्यगतिं चेन्नहि रक्षेर्भो अन्योऽमुं कोऽवतु विश्वा-

---

१ निबिरीसं दृढं गाढमिति कोशः ॥ २ प्रकटयितुमिच्छुः ॥ ३ सरोरुह इन्दिरेति पा० ॥ ४ अभ्यस्तपरिचयः ॥ ५ अवशः ॥ ६ उत्सारयन्दूरीकुर्वन् ॥ ७ स्त्रीतरा ॥ ८ नेत्रश्रुतिश्चक्षुःश्रवाः ॥

Digitized by Google

श्रय विष्णो । पूजां सम्यग्देव यथाशक्ति विधातुं कुर्वे यत्नं तद्विमुखो मा भव किंचित् ॥ ४ ॥ विश्वस्मिन्कस्त्वत्त उदारः करुणाब्धे कर्तुं दीनानुग्रहमेकः परमास्ते । स्थित्वाऽन्तः संशास्ति सदा नो य इहायं वा तं त्वां वेद्मयच्युत तन्मामव नित्यम् ॥ ५ ॥ लोकेशाद्यस्तारकयोगाद्यमनन्तं स्वत्वेनान्तः पश्यति यन्नस्तुत एकम् । वाचा नाप्यो नापि हृदेति श्रुतिमूलात्सच्चिन्मात्राकारमजं तं कलयेऽहम् ॥ ६ ॥ संसारान्धूद्धारवरत्राभिध[1] विष्णो चित्तेकृत्य त्वामज पूजां विदधेऽहम् । तन्नोऽनन्ताधिष्ठितमूर्ते कुरु शंभो सन्तप्तानामान्तरसौधोदकधार ॥ ७ ॥ यत्पद्माक्कैवल्यपदं यात्यनिवर्त्यं साक्षी सर्वस्यापि य एकश्चितिरूपः । सान्द्रानन्दो भक्तमनोज्योत्स्निकयाक्तस्तन्द्रामन्तः कृन्ततु नित्यं मम सोऽजः ॥ ८ ॥

हरिः ॥ कल्याणदन्त्रिदिवकुल्यावहेलकृतिकल्यानुरूपकृपयाऽतुल्यापकार्यररुशल्यावसित्यशनिबल्याशयेश भगवन् । अल्याहताङ्घ्रपदधूल्यापवार्य मतिशूल्याधिमाशु सुरभूबल्यात्मको भव सुगल्यारवप्रिय नृपल्याचितास्य सुखने ॥ १ ॥ शङ्कावहीनमजसंकाशकार्यमिह पङ्कादुदञ्चयसि नो किं कारणं तदिमर्मिकारगेश वद कं कालवैतु[2] शरणम् । अं कामितद्युतरुमङ्कादुपेक्ष्य च कथंकारमच्युत हरे शं कामयेत बत तङ्कातिरम्यपदपङ्काधिजात परतः ॥ २ ॥ नन्दात्मजं कुपितवृन्दारकेन्द्रमदकन्दानुरूपखनकं वन्दामहे रुचितवृन्दावने शिशुकवृन्दैस्सुहिण्डि[3]ततनुम् । वन्दारुमौनिजनमन्दारकं स्फुटितकुन्दानुगस्मितसुधाचन्दायितं निहतसुन्दात्मजं परममन्दादरं परगुरुम् ॥ ३ ॥ जंभान्तकद्विरदकुंभाऽयगोपिकुचसंभारमर्दनकरं तं भावये कनकरंभास्थपत्रसुभगंभावुकांबरधरम् । कुंभारमा[4]स्यपविडंभास्तहस्तपरिरंभान्वयेन सुखयन्नम्भांसि यो वेजति मां भालयेत च नु डिंभाश्रयैकचरणः ॥ ४ ॥ बन्धार्तिमाशु मम सिन्धावधीतगतिरन्धांबकोऽपनयतादुन्धाब्यभूरुडनुब-

---

१ दामरज्जुर्वरत्रा चेति शब्दव्यूहतरङ्गिणी ॥ २ तुल्यसंकाशनीकाश इति कोशः ॥ ३ हिडि–क्रीडायाम् ॥ ४ अपास्य ॥ ५ वज–गतौ ॥

Digitized by Google

न्धाभिषेककरसन्धापरः स मधुहा । मांधातृसूनुहितसन्धानव-
ल्लिमिह यं धातृमुख्यऋषति स्कन्धान्तरेयमपि सन्धारयामि च
सगन्धान्तरगंकरिणः ॥ ५ ॥ वित्तेशसूनुसुखवृत्ते कृपाजलल-
वोत्तेजितो मुररिपुश्चित्ते चकास्तु मम मत्तेभभीहरणवित्तेक्षितः
प्रतिपलम् । कृत्तेतरेशमतिमत्तेह एव लघु नुत्तेन्द्रनीलविभवो
दत्तेष्टिराज इह नृत्तेष्टशंभुवलिसत्तेडितोरुचरितः ॥ ६ ॥ गन्ताऽ-
स्म्यहं शरणमन्तातिगं भुजगकृन्ताधिरूढमिति मच्चिन्तामर्त्यरिपु-
हन्ता निवारयतु सन्तापनीं करुणया । नन्तात्मदेवमतिसन्तान-
लिप्सितसुचिन्तामणिर्यदुकुलेऽनन्तानुजात उरुसन्तानकप्रतिमद-
न्ताश्रयस्मितसुधः ॥ ७ ॥ एणाङ्कचूडपरबाणायितो रुचिरशोणा-
ब्जबन्धुचरणः प्राणाधिकस्वजनपाणावपि प्रथितवीणाक्वणे ख
उदितः । प्रीणातु नोऽसुरकशाणाधिकं स इह हूणादिकं च बलतः
क्रीणाति यः सुगुणिनृणां कृते सपदि बाणाहमः प्रशमनः ॥ ८ ॥
श्रीबालकाह्वयमुनिप्रवरांघ्रिपद्म[1]भल्लाक्षनीलगलनामकनिर्मितं यः ।
भक्त्या विधुस्तवमधुद्रवमन्तरङ्गे कुर्याद्भवेत्स यतधीः परिपूर्ण-
कामः ॥ ९ ॥

इत्यष्टकत्रयपरिमितो विधुस्तवमधुद्रवः समाप्तः ॥

स्वात्मसुधाकरप्रारम्भः ।

हरिः ॐ ॥ स्थास्नुचरिष्णुपदार्थावेशादर्शं निजानुभवगम्यम् ।
सच्चित्सुखस्वरूपं शिशुसंज्ञमहं स्मरामि किमपि महः ॥ १ ॥
अतिदुर्लभं नृजन्म प्राप्य नहि त्वं सिषाधयिषसि यदि ।
पुरुषार्थं पुंस्त्वास्य[2] केह तवाहारमुख्यतः सैषा ॥ २ ॥
चेत्सार्था पशुतापि[3]यलमिति घट्टकुटीप्रभातवक्ष्यायम् ।
संश्रयसि भोगिलोकातो मम वचनं शृणुष्व सुखमृच्छेः ॥ ३ ॥
स्वाप्ययमायानूना जाग्रत्कालिक्यवेहि सम्यगिति ।
विशयो यदि चेत्प्रत्यग्दृष्टिमवष्टभ्य दर्शने यस च ॥ ४ ॥

---

१ राजहंसस्तु भल्लाक्षः । इति कोशः ॥ २ साधयितुमिच्छसि ॥ ३ पुंस्त्वम् ॥

Digitized by Google

संरूढेऽस्मिन्नाग्रन्मायाऽस्तमियात्सुषुप्तिगेवाख्याः ।
जातेयं कुत इति मा चिन्ताऽस्त्वस्त्वपि तु कथमिमां हन्याम् ॥५॥
अविचारितरमणीया कथितेयं तत्त्ववादिभिर्वीक्षाम् ।
सहते न यत्स्वरूपं भ्रान्तिग्राहग्रहं स्वरैषि पदम् ॥ ६ ॥
अहमस्मि नित्यशुद्धः प्रत्यगभिन्नस्तथोऽपधिविहीनः ।
'न निरोध' 'एक एवाग्र' एवमादिश्रुतिर्भणति यस्मात् ॥ ७ ॥
त्रिपरिच्छित्तिविहीनस्तद्वदहं त्रिविधभेदभिन्नोऽस्मि ।
अन्यस्मिन्नहमर्थारूढ्या भेदश्रुतेरभावाच्च ॥ ८ ॥
इदमर्थभूतबाह्यप्रपञ्चवस्तुष्वनात्मतैवमिह ।
अहमर्थ आत्मता च स्वानुभवाद्बुधजनस्य चाभिमता ॥ ९ ॥
एते इदमहमाख्ये बुद्धी स्यातां विभिन्नविषयेऽत्र ।
देहे चेदंकारा धीर्दैहालंबनाऽपराऽऽत्मवशा ॥ १० ॥
स्वशरीर इदंध्यास्पद इह याऽहंमतिरियं महाभ्रान्तिः ।
यत्तदतस्मिंस्तद्बुद्धिरूपाऽभ्रान्तस्य न क्वचिद्भवति ॥ ११ ॥
जडरूपपिण्डमेतन्नाहंधिषणाश्रयं ह्यनैकान्त्यात् ।
मृत्पिण्डादिषु तद्वत्स्याच्चोऽचित्वाऽविभेदतः खमुखम् ॥ १२ ॥
तस्माच्चिद्रूपात्माऽहंबुध्यर्थोऽचिदेवमिदमर्थः ।
एष स्वयंप्रकाशोऽस्याहंविषयत्व एव सति साक्षात् ॥ १३ ॥
वृत्त्यनधीनतया घटकुड्यव्यतिरेकतो यतः स्फुरति ।
साक्षित्वेनाच्छान्तर्व्याप्याज्ञानं सवृत्तिरूढचिदा ॥ १४ ॥
ग्रसतेऽस्तमेति वृत्तिस्तस्मायःपीतशंबरन्यायम् ।
स्वात्मन्ययमहमस्मीत्यवधारय निर्वृतिं परां च भज ॥ १५ ॥
योऽहंशब्दार्थोऽयं त्वंशब्दार्थो भवेन्न सन्देहः ।
त्वंप्रत्ययार्थ एवं स्यादहमर्थोऽपरो न कुत इतिचेत् ॥ १६ ॥
लक्ष्यीकुरुत उभौ तौ शब्दावेकं चिदात्मवस्तु यतः ।
अर्थमिमं श्रुतिराहाहंब्रह्मास्मीति याजुषी मधुरम् ॥ १७ ॥
जहदजहल्लक्षणया वैशिष्ट्यांशग्रहाणतः सिध्येत् ।
सम्यगखण्डरसस्त्वमहंब्रह्मेति मुख्यवाक्येषु ॥ १८ ॥

Digitized by Google

स्वात्मान्यतया भातं बुध्वाऽऽत्मत्वेन चैतदात्म्यमिदम् ।
सर्वमितिश्रुत्यैतद्वेदनमपि चिद्घने विलाप्य परे ॥ १९ ॥
स्वस्थो भवति नरश्चेन्नेच्छन्नपि मुच्यते 'जगत्सत्ता ।
तत्सत्तयैव सिद्धा कारणसत्तैव कार्य इष्टेति ॥ २० ॥
एकत्वेऽपि पृथक्त्वेनोक्तिः प्रत्यक्प्रकाशरूपस्य ।
अन्तःकरणविभेदानुरोधतः सर्वसाक्षिणो भवति ॥ २१ ॥
औपाधिकभेदेऽस्य प्रलीन ऐक्यं व्रजेच्चिदा खमिव ।
घटनाशे तत्सर्वत्यागे यत्स्यात्तदात्मना भाव्यम् ॥ २२ ॥
समवस्तुपरित्यागे शेषस्त्वात्मेति शासनाच्छ्रुत्या ।
निष्ठामास्थायैतामन्तेऽपि नरो यदेति लघु मुक्तिम् ॥ २३ ॥
श्रुत्येह चेदवेदीदित्यनयाऽऽमैकवित्तिरुपगीता ।
नोचेन्महती नष्टिश्चोक्ता तस्मान्नृलोकगामिपशुः ॥ २४ ॥
यः कुशकाशालंबन्यायेन पदं समारुरुक्षति सः ।
पुरुषपदवाच्य एषोऽपर इह शोच्यः सदाऽऽदिमो वन्द्यः ॥ २५ ॥
अत्र तु मर्यादैकावनमुपदेशक्रमस्त्विति जगाद ।
ज्ञसेर्हेतुर्भगवान्वसिष्ठ इति चान्तवासिशुद्धमतिः ॥ २६ ॥
तत्संशोध्य प्रज्ञां देशिकमेकं समाश्रयेद्यदिह ।
श्वश्रूनिर्गच्छोक्तिन्यायेनास्याधिकारिताऽऽत्मगिरि ॥ २७ ॥
करुणाघूर्णितचित्तो देशिक एतं स्वरूपसाम्राज्ये ।
अभिषेक्ता चिन्मुद्राबन्धनतस्तं द्रुतं शरणमीयात् ॥ २८ ॥
देहाक्षादावहमिति ममेति यो भाव एषकोऽध्यासः ।
विदुषाऽवश्यं त्याज्यः सम्यक् स्वात्मैकनिष्ठयाऽयमपि ॥ २९ ॥
वासनयाऽध्यासोऽस्यास्तानवमाहुर्विमुक्तिरित्यृषयः ।
तत्तां तनुतां नयतान्नैरन्तर्यस्वरूपनिष्ठातः ॥ ३० ॥
चेल्लक्ष्यच्युतमीषद्बहिर्मुखं धीस्ततस्ततो निपतेत् ।
सम्यक् प्रमादबलतः सोपानच्युतविलासकन्दुकवत् ॥ ३१ ॥
अपकृष्टं शैवालं यथाऽऽवृणोति क्षणाज्जलं च तथा ।
मायाऽऽवरते प्राज्ञं वाऽपि पराङ्मुखमतोऽन्तरदगास्त्र ॥ ३२ ॥

१ वेदनं (ज्ञानम्) । २ ज्ञप्तिर्ज्ञानम् ॥

Digitized by Google

अन्तःशीतलतायां लब्धायां शीतलं जगद्यस्मात् ।
तस्मात्प्रत्यग्दृष्ट्या स्थेयं पाषाणवत्समाप्यैताम् ॥ ३३ ॥
हृदयग्रन्थेर्विलयस्तदैव निःशेषतो यदा यमिनाम् ।
अद्वैतावस्थानाह्वयसहजातः स्वदर्शनं भवति ॥ ३४ ॥
चित्तेऽर्थादर्थान्तरमीते या स्थितिरिमामधिष्ठाप्य ।
मूकान्धबधिरकल्पं स्थातव्यं योगिभिर्निजानुभवे ॥ ३५ ॥
अभिलषितवस्तुलब्धिक्षण इह याऽन्तर्मुखस्थितिरुदेति ।
तामाश्रित्य समस्तं विरहय्य सदाऽनुभूतिगो ना स्यात् ॥ ३६ ॥
संत्यक्त्वाभावेभ्यः सर्वेभ्यो भावनां तदवशिष्टा ।
या संविद्ब्रह्माख्या सैवाहमिति स्थितो भवेत्सततम् ॥ ३७ ॥
कल्पितसर्वपदार्थाधिष्ठानं ब्रह्म केवलं कथितम् ।
यत्तदहमस्मि नित्यं परमिति मौनेन तत्पदं समियात् ॥ ३८ ॥
वैराग्यस्य फलं स्यादात्मज्ञानं तथोपरतिरस्य ।
हेतुस्वरूपकार्याण्यपि क्वचिद्व्यभिचरन्ति कस्मिंश्चित् ॥ ३९ ॥
एवमपि पूर्णबोधे विदेहकैवल्यभाग्भवेत्कोऽपि ।
वैराग्योपरतिभ्यामृतेऽपि ताभ्यामिहोर्ध्वगतिरेव ॥ ४० ॥
ब्राह्मैश्वर्यतृणीकृतिरवधिर्विरतेः स चैष बोधस्य ।
देहात्मवदेवास्य स्वरूपसम्पत्तिरूपदार्ढ्यो यः ॥ ४१ ॥
मर्यादोपरमस्य स्वाप्ययवद्विस्मृतिः परा यैषा ।
कञ्चित्कचित्पुमांसं त्रयोऽपि वृणतेऽस्य निर्मलतपस्तः ॥ ४२ ॥
जीवन्मुक्तिसुखेच्छुः संगृह्णीयात्समं निरपवादम् ।
ज्ञानान्तरङ्गसाधनमेव हि मननाद्यपेक्षया श्रवणम् ॥ ४३ ॥
आचार्यैः श्रवणं नामाङ्गि विधीयत इतीरणाद्वेः स्तः ।
मननिदिध्यासाख्ये नो बाह्याङ्गे शमादिकमपेक्ष्य ॥ ४४ ॥
उत्तरमीमांसाकृद्भगवान्व्यासोऽथशब्दतः प्राह ।
साधनचतुष्टयानन्तरकृत्येत्येव चात्मजिज्ञासा ॥ ४५ ॥
साधनसुभगंभावुकपुरुषमनालोच्य वरतिबोधतनुः ।
दिक्संख्याकं साधनमवश्यमर्ज्यं मुमुक्षुणा प्राक्तत् ॥ ४६ ॥
ज्ञानं च वस्तुतश्चं ह्युपासनं कर्तृतश्चमिति विद्यात् ।
बोधोऽनिच्छायामपि यत्स्याद्विषयेन्द्रियादिसंबन्धे ॥ ४७ ॥

Digitized by Google

अन्यदकर्तुं कर्तुं वाऽपरथाकर्तुमेष शक्तो ना ।
तस्मात्तत्तदधीनं प्रतिबन्धे सति भवेन्न दृढबोधः ॥ ४८ ॥
नात्र विचारोऽपगुणः स्यात्कश्चिदपि तन्निरुध्य प्रतिबन्धम् ।
सततं चिंतयतादा मृतेः स्वरूपं न चेद्भवति सिद्धिः ॥ ४९ ॥
अन्यस्मिन्वा जन्मन्यैहिकमित्यादिसूत्रतः श्रुत्या ।
शृण्वन्तोऽपीत्युक्ता स्यादेव च तत्पुनः पुनर्विमृशेत् ॥ ५० ॥
पूर्णानुभूतिमीतः कुर्वन्निव कर्म लक्ष्यतेऽपि जनैः ।
दग्धपटन्यायेन स्थित्वाऽन्ते स्वप्रतिष्ठितो भविता ॥ ५१ ॥
चेत्संकल्पाशानुसन्धानहानं कुर्यान्मर्त्यः सर्वदाऽचित्ततां सः ।
संप्राप्तः स्याच्चेतसोऽकर्तृता या शास्त्रादौ सा निर्वृतिः सा समाधा ॥
प्रोक्ता साक्षात्केवलीभाव एतन्निष्ठो भूयाद्भूय उत्पत्यकाङ्क्षी ।
स्वारब्धान्तेऽत्यन्तदेहापयोगे वैदेहीं चोपैति मुक्तिं स्वविद्वान् ५३
ॐ५४ ॥ बालाङ्गभगवत्पादकिङ्करोऽसितकन्धरः ।
विरच्यात्मकलानाथं भक्तितस्तत्पदेऽकरोत् ॥ ५४ ॥ ओं शान्तिः ॥

इति स्वात्मसुधाकरः समाप्तः ॥

श्रीयोगमञ्जरी ।

हरिः ॥ मम तु भगवद्बालाख्यश्रीविकर्तनविग्रहं विबुधसहजा-संवित्सस्यप्ररूढसुरद्रुमम् । कविकुलगिरां दूरं पारं भवज्वरवारिधेः सततमभयायैषोऽहं संनमस्य उपारतम् ॥ १ ॥ पवनयमनाद्धंसः सोऽहं स्वयं परमित्यहो विदितचरितोऽप्येवं न स्यान्नरः स्वयमित्यहम् । नियमनविधिं वक्ष्ये तद्वाक्परिश्रमतो गतो भवति हि मरुत्प्राणः शून्यं पदं विवृतामृतम् ॥ २ ॥ वृषणगुदयोर्मध्ये मूलं पदस्य नियोजयंस्तदितरमथो मेढ्रे कृत्वा दृढं हृदये हनुम् । स्थिरतरदृशा नासाग्रं स्वं निरीक्ष्य जितात्मवान्स्थितिमिह सदा कुर्यात्सिद्धं भवेदिदमासनम् ॥ ३ ॥ हितमितभुजो मुद्गं शालिं यवं च सितां पयोघृतयुतमिहाश्नन्तो नित्यं वसेयुरथासने । निजपदतले

---

१ ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात् । ब्र० सू० ३ । ४ । ५१ ॥
२ शृण्वन्तोऽपि बहवो यन्न विद्युरितिश्रुतिः ॥ ३ समाधानम् (समाधिः ॥)

Digitized by Google

ऊर्वोर्यर्यस्मिंस्थितौ भवतो दृढं बहुतररुजामस्तं पद्मासनं त्विदमुत्तमम् ॥ ४ ॥ जितरय इतो बाह्यं वायुं प्रपूर्य सुधांशुना निजबलसमं यावच्छक्यं निरुध्य मरुन्मनाः । पवनविलयो नासाग्रे यद्भवत्यतिवेगतो मरुतमखिलं मन्दं मन्दं त्यजेदथ भानुना ॥ ५ ॥ यत इह मरुत्यक्तो नाड्यामवेदनया खगं पुनरपि कलासंख्यामात्रात्मकेन च पूरयेत् । नियमितमसुं कृत्वा तस्माच्चतुर्गुणमात्रया पवनमिडया तस्यार्धेन त्यजेत्समयेन वा ॥ ६ ॥ विसृजतु खगं मन्दं मा भूद्रुतं बलहानिकृद्भवति च यतः शीघ्रं वा स्यान्मरुद्ग्रहणं हठे । प्रहरपरतः सर्वत्रैवं दिनं प्रति शीलयेद्विजितपवनः कोऽपि स्याच्चेत्स्वयं गुरुशिक्षितः ॥ ७ ॥ पवनविजये बद्धाकूतः सदा मृदुपीठगो वदनकुहराकृष्टं वायुं यथाविधि कुम्भयेत् । परशिवगते केदारे स्यान्मरुद्ग्रमनं यथा पिहितवदनः फूत्कारं तत्तथैव समाचरेत् ॥८॥ अथ निजपदग्रन्थिं मूले दृढं घटितं व्यधादितरमपि तत्कृत्वा जानोरधःस्थितसंधिगम् । उपरि गतधीः सामोदं स्वां निपीड्य च सीवनीं पवनगमनं ब्रह्मद्वारे कुर्यात्परमादरात् ॥ ९ ॥ द्वितयमधिकं गुह्यं गुह्यादिदं परयोगिभिः परिचिततरं साक्षात्सिद्धेः सदा परमायनम् । निजहृदि हनुं निक्षिप्योर्ध्वाकर्षादनिलः शनैरमृतकुहरं गच्छेत्स्वैरं निरञ्जननामकम् ॥ १० ॥ मूलाधारे पवननियमश्चेतसा कार्य उक्तस्तस्मिंल्लीनं भवति हि मनो यावदेवं विदध्यात् । भूयस्तस्मादुपरि मरुतं कन्दपार्श्वे निरुन्ध्यात्स्वस्थो भूयान्नर इह समाः सर्वरुग्जालमुक्तः ॥ ११ ॥ तद्वच्छून्ये नियमनबलान्निर्जितः प्राणवायुर्दद्यादायुर्नियतममरप्रार्थितांश्चैव सिद्धीन् । पार्ष्णिं योनौ घटितमपरं भूमिसंलग्नपृष्ठं कृत्वाऽऽकुष्ठं दृढपरिकराबद्धमप्याशु कुर्वन् ॥ १२ ॥ आपूर्याभ्रंकषमथ बलात्कण्ठबन्धं विधास्यन्प्राणं मध्ये नयतु विधिनेयं महामुद्रिकोक्ता । तावद्यावद्भवति सदृशा संख्यया वामभागे सूर्याङ्केऽथाप्यनुदिनमिमां शीलयेद्युद्धियुक्तः ॥ १३ ॥ नीत्वा चञ्चूपुटसदृशतामोष्ठयोर्लग्नजिह्वामाकुष्याभ्रंकषमृजुमनाः कुम्भयित्वाऽथ मन्दम् । फूत्कारं चिद्गगनकुहरे सन्ततीकृत्य मोदात्कुर्यान्नासापुटयुगवशाद्रेचकं गुह्यमुक्तम् ॥ १४ ॥

Digitized by Google

एतत्क्षुत्तृड्ज्वरहरमतिप्रौढशास्त्रप्रबन्धे शक्तिं दद्याद्धृदि परसुखं चैव कार्यं तदेवम् । कारोर्भस्त्रासदृशमिह यः पूरयेद्रेचयेच्च नाडीशुद्धिर्भवति यमनादग्निमासोर्ध्वतो वा ॥ १५ ॥ कुंभो द्वेधा भवति सहितः केवलश्चेति तावत्कुर्यान्नित्यं सहितमिह यावद्भवेत्केवलाख्यः । हित्वाऽऽकर्षं पुनरपि मरुद्रेचकं साधितेऽस्मिन्सम्यक्सिद्धं दिवि भुवि समुद्रादिकेऽप्यस्य सर्वम् ॥ १६ ॥ मात्रावृद्ध्या परिचितमरुद्ब्रह्मरन्ध्रं गतश्चेन्नादव्यक्तिर्भवति सुतरां कुण्डलीसुप्रबोधात् । सेयं शक्तिः स्वपिति नियतं ब्रह्ममार्गं स्ववक्त्रेणाच्छाद्यैनामुपरि गतनिद्रां नयेत्सावधानम् ॥ १७ ॥ पार्ष्ण्यौ बध्वा गुदमथ समाकृष्य मध्यं स्वकीयं पश्चाद्वायुं हृदयकमले कण्ठसङ्कोचनेन । गाढं बद्धं कुरु निजहनुं कुण्डलीबोधनार्थं सम्यग्बन्धत्रितयमुदितं जन्मसंसारजैत्रम् ॥ १८ ॥ दीर्घीकुर्वंस्त्विह शिखिशिखां मारुतेनाहतां संतप्तां कृत्वा द्रुतमथ तयोत्थापयेदादिशक्तिम् । बन्धश्चैवं नयति पवनं मध्यमार्गं स्वयं हृद्युक्तं कुर्यान्नियतमपरं द्वन्द्ववर्गं च वेगात् ॥ १९ ॥ अस्मिन्नित्यं दृढपरिचिते नामृतः कोऽत्र भूमौ गत्वा मृत्योर्वदनकुहरेऽप्यस्य भीर्नैव यत्तत् । पारम्पर्यादधिगतमिदं शीलयेन्नित्ययुक्तः संसिद्धिस्तं प्रविशति तरां सम्यगभ्यासयोगात् ॥ २० ॥ स्वोदर्याग्नेर्जलमिव भवेदन्यथा शीलितश्चेदुड्डीयानो विधिमनुसृतो मातरिश्वायते च । तद्वत्कण्ठीरवपतिरयं मृत्यिवभेन्द्रस्य चोक्तः सम्यङ्नेचेदपि यमवतां कालतीच्छातिगत्या ॥ २१ ॥ मूलस्थाने प्रवदति सुधीर्मूलबन्धं तदूर्ध्वं तूड्यानाख्यं नियमिविनुतं पश्चिमं तानरूपम् । नाभौ वक्षस्यपि च चिबुके स्थापिते वक्ति चैतं साक्षाज्जालन्धरमिह सुधापातविच्छेदहेतोः ॥ २२ ॥ मूले बन्धो भवति सुखदः सर्वदाऽभ्यासयोगे कंठस्थाने स तु नियमिनां पूरकान्ते दृढः स्यात् । कुम्भान्ते संस्मरति नियतं रेचकादौ विशिष्टं तूड्डीयानं निरवधिकृपापूर्णतीर्थाग्रितीर्थम् ॥२३॥ चेतोवृत्त्या भवति मरुतो धारणा यत्र सम्यक्तत्रोत्थान्संहरति सकलानामयाञ्शीघ्रमेषा । तस्मात्कार्यं पवनयमनं षोडशाधारदेशेष्वङ्गुष्ठादिष्वपि नियमिना सर्वदाऽऽरोग्यसिध्यै ॥ २४ ॥

Digitized by Google

बध्वा वामेन तु चरणपाष्ण्यैंव योनिं तदूरुण्यन्यं पादं सपदि घटयन्भूमिसंलग्नहस्तः । मन्दं मन्दं नियमितमनाः स्वस्फिचौ ताडयेद्यस्तस्यारूढो भवति पवनः शून्यमार्गे क्षणेन ॥ २५ ॥ सिद्धैर्गुप्तो निरुपमगुणैर्यो महावेध उक्तः सोऽयं ज्ञेतद्भयमसुभृतामष्टसिध्येकपात्रम् । यत्तं मृत्योर्वदनकुहरस्येन्द्रजालैकजालं तस्मान्नित्यं दृढमनुसरेदस्य संशीलनं ना ॥ २६ ॥ पूर्वं स्वेदोद्भव इह मतो मर्दनं तेन कार्यं पश्चात्कम्पस्तदनु भविता दार्दुरी पद्मपीठे । प्राणायामोत्तम उपगतस्त्वग्निमात्रासमं यो रोधस्तस्मिन्विसृजति भुवं भेकवद्युक्तयोगी ॥ २७ ॥ सिन्धुज्ञायीगतलवणतस्तालुमूलं दिनादौ घृष्ट्वा जिह्वोद्गमनविधिना चालनं चैव दोहम् । कृत्वाऽऽ मासं स्पृशति सुखवृत्त्यैव सा नासिकाग्रं यत्तन्मूलस्थितलघुसिराकर्तनं तेन कुर्यात् ॥ २८ ॥ यस्येयं संस्पृशति पथमेवैष योगार्ह उक्तो यस्माद्यस्य स्पृशति सततं मध्यमोऽयं ततोऽन्ये । हीनाः क्षाराद्विलय इह नोचेत्सिराबन्धनस्य हन्त्रीवल्या ज्वरपदगया छेदकार्यो न चान्यैः ॥ २९ ॥ ह्योगोदोहोद्भवमथ जले भृङ्गराजस्य सम्यक्पक्त्वा जिह्वां गमय सह तेनोर्ध्ववक्त्रां कपाले । संघृष्यादौ खमुपरिगं संस्पृशन्ती स्थिता यत्तन्मुद्रैषा जगति परमा योगिसर्वस्वपेटी ॥ ३० ॥ खेचर्याख्या भवति रसना चित्तयुक्ता खसंस्था ह्यन्वर्थैषा जनिमृतिमहारण्यभेत्री कुठारी । एवं चन्द्रामृतमपि पिबेद्यः क्षणं संस्थितः सन्मासादर्वाग्जयति यमवान्कोऽपि मृत्युं न शङ्का ॥ ३१ ॥ क्षुत्तृष्मोहज्वरजडिमरोगादिकं नास्य किंचिद्विन्दोः पातो नहि भवति यस्यास्ति मुद्रा समुक्ता । जीवेत्सोऽयं चिरमिह मृणालातिकान्तिर्नराग्र्यः सारज्ञोऽष्टादशविभवयुक्चैव नित्याधिवासी ॥ ३२ ॥ उज्जिह्वोऽथाङ्कुति शशिसिरायां तथोङ्कं सूर्यनाड्यामप्यामन्त्र्याधिकतररयाजिह्वया ताडयित्वा । मङ्कं खे तद्वद्गमय सह वायुं तया मध्यनाड्यामेतङ्कुह्यं यमिवरगुरोर्वाक्यारन्दं प्रपद्ये ॥ ३३ ॥ जिह्वामन्तर्दशमथ बहिर्भ्रूयुगान्ते निबध्नन्नीरूपं यः स्मरति भगवद्रूपमत्रैकचित्तः । उन्मन्यस्मिन्क्षण उदयमीयात्स्वयं राजयोगाकाङ्क्षी चैतां कलयतुतरां शीघ्रसिध्या इयं

Digitized by Google

वत् ॥ ३४ ॥ नित्यं सारप्रपतनवशात्तालुमूलस्थचन्द्रात्कायापायो न तु नियमिनां खेचरीसिद्धिभाजाम् । चन्द्रस्थैर्यं कुरु नियतवृत्त्यैव तद्वन्धनाद्यन्यः पन्था जगति विहितः कायसिध्यै नराणाम् ॥ ३५ ॥ ज्ञात्वा कालागमनममृतस्यन्दसंदोहगेहं गत्वा स्थातुं यमिभिरमरारार्धितैरशक्यते हि । यस्मात्कालोऽप्यभिभवति नो यद्गृहाधिष्ठितं तत्कर्मैतत्प्रोच्यत इह मुदा वञ्चनं कालमृत्योः ॥ ३६ ॥ सोऽहंभावान्नयनयुगलं किञ्चिदुन्मील्य वा यस्त्वन्तर्भ्रूयुग्दहरविवरादूर्ध्वगं सन्निदेकम् । तेजः पश्येत्स्थिरतरदृशा भ्रूयुगं किंचिदुत्क्षिप्यास्यैव स्यादनुभववलं दिव्यदृष्टिश्च तस्मिन् ॥ ३७ ॥ एषा शांभव्यखिलयमिनां सन्ततानन्दवल्ली भद्रा मुद्रा निखिलनिगमान्तार्थगम्याऽतिगुप्ता । तुर्यावस्थां जनयति सदा सम्यगभ्यस्यमाना सिद्धिं चैवोपरि बहुतरां यत्नवर्जं क्षणेन ॥ ३८ ॥ तर्जन्या यः पिहितनिजकर्णे स्वनं यं शृणोति तस्मिंल्लीने मनसि नयनान्तर्गतानीलरूपम् । ज्योतिःस्थानं सततमवलोक्यायमाप्नोति शीघ्रं पूर्णानन्दामृतपदमभेयं निरालंबवृत्त्या ॥ ३९ ॥ यस्मिन्स्वच्छे ख उपरतं स्यान्मनो निर्निरुद्धं यस्मिन्दृष्टिर्भजति सुतरां स्थैर्यमालोकहीना । यस्मिन्काले पवनविलयश्चापि मुक्त्वाऽवरोधं तस्मिन्काले भवति सहजा खेचरी सिद्धिरुक्ता ॥ ४० ॥ यमीन्द्राणां हृत्कैरवसुकृतपूर्णामृतकरो जयत्यद्वैताख्यश्च्युदधिनिलयो योऽत्र विदितः । शिशोर्नाम्ना तत्पद्रतिरहमिमां नीलगल इत्युदीतः सम्पाद्यार्पय उपरि योग्युक्तचरणे ॥ ४१ ॥

हरिः । ओम् ॥ इति योगमञ्जरी समाप्ता ॥

इति नीलकण्ठयमीन्द्रस्य कृतिषु भक्तिज्ञानतरङ्गिणी समाप्ता ॥

अमृतलताप्रारम्भः ॥

ओं नमो गणेशाय हरिः ॥ तस्मा अर्भकनाम्ने कस्मैचन तेजसे नतिः सैषा । खानिलवन्ह्यब्ज्यान्तं स्रक्फणिसदृशं यतः समुद्भूतम् ॥१॥ प्रणिगदिकर्मीक्रियते परमिह संवित्स्वरूपमिति सर्वः । भद्रं कृषीष्ट

---

१ प्रतिपाद्यते—निगद्यत इत्यर्थः ॥

Digitized by Google

हैयंगवीनपेषं प्रपिष्य दौर्भाग्यम् ॥ २ ॥ मायाकार्यमशेषं मायैव परं निरूपणे नान्यत् । यद्घटकटकाद्यखिलं मृद्घाटकमुख्यरूपतो विदिम् ॥ ३ ॥ स्वप्न इवात्र च कण्ठे जाग्रति चित्कुड्य एव सेयमपि । जागतचित्रं रचयति नश्यति सम्यङ्निरीक्ष्यमाणैषा ॥ ४ ॥ सह कार्येण हि तुच्छाऽनिर्वचनीया च वास्तवी कथिता । श्रौत्या विचारदृष्ट्या लोकदृशा चापि सा स्वयं क्रमशः ॥ ५ ॥ यामा सेयं मायाऽविद्या या नैव विद्यते साक्षात् । प्रोच्यत एवं बहुधा ज्ञानेन विनश्यतीति चाज्ञानम् ॥ ६ ॥ अपवरकस्थतमोवत्स्वाश्रयविषयेयमीर्यते मुनिभिः । जीवाश्रयेति केचन तन्नसमञ्जसमदोऽनुभवदौस्थ्यात् ॥ ७ ॥ यत्पूर्वसिद्धतमसः पश्चिम इह नाश्रयस्तथा विषयः । अपिच भवेज्जीवाश्रयताऽत्राज्ञानाभिमानिता बलतः ॥ ८ ॥ तिग्मगुमिवान्धकारं नावरिता चितिमितीह मास्तु धृतिः । साऽस्या वृत्तिचितेरिव यन्न विरोधः स्वकीयसंश्रयतः ॥ ९ ॥ तदिदं तथा यथाऽरणिसंस्थशिखी नैव बाधकस्तमसः । किन्तुमथनोत्थपावक एव भवेत्साधु साधकस्त्वपरः ॥ १० ॥ विक्षेपावृतिभेदेनेह द्वैरूप्यमुच्यते शक्तेः । विक्षेपाभिधशक्तिर्लिङ्गाद्यण्डान्तमुत्सृजेदपरा ॥ ११ ॥ आवरणाख्याऽऽवरते ह्यन्तर्दृग्दृश्यभेदमथ बाह्ये । सर्गब्रह्मविभेदं चैषा संसारहेतुरिति विद्यात् ॥ १२ ॥ लोकं कर्तुमकर्तुं वाऽपरथा कर्तुमीशत इतीशः । वशमायोपधिरुदितः श्रुतितः स ब्रह्म कारणं कथितम् ॥ १३ ॥ जागतविभ्रमवर्गस्याधिष्ठानं भवेद्यदेतदिह । त्रैयन्तेषु समुक्तं ब्रह्मपदेनान्वहं स कूटस्थः ॥ १४ ॥ योऽधिष्ठानतयोक्तो देहद्वयचेतनस्तु नः साक्षी । जीवः साधिष्ठानव्यष्ट्यज्ञानोदरस्थिताभासः ॥ १५ ॥ सत्यो भवति न चैषां भेदस्त्वौपाधिको भवेत्किन्तु । ऐक्यमखण्डरसं तद्घटेत वेदान्तवाक्यपरिनिष्ठम् ॥ १६ ॥ शुद्धचिदीशो जीवस्तद्द्वज्जीवेशयोर्भिदाऽविद्या । तच्चिदुपराग एवं षण्णोऽनादय उदीरिता आर्यैः ॥ १७ ॥ संसृतिव्रततेर्बीजं वाऽध्यारोपं वदन्त्यथाध्यासम् । सोऽतस्मिंस्तद्बुद्धिः सं-

---

१ दौरात्म्यम् । इति पाठः ॥ २ गृहम् ॥ ३ ईशत ईशनीभिः । इति अथर्वशि० उ० ॥ ४ स्वनयोर्भेदो द्वयोस्तथेति पा० ॥ ५ समः सर्वः ॥

Digitized by Google

मजन्तुसमो द्विधायमुपदिष्टः ॥ १८ ॥ एको ज्ञानाध्यासस्त्वन्योऽर्थाध्यास उच्यते च पुनः । अर्थाध्यासो द्वेधा स्वरूपसंसर्गभेदतः कथितः ॥ १९ ॥ अज्ञानविषयरज्वहिरर्थाध्यासः समादृतः सद्भिः । रज्जुभुजङ्गज्ञानं ज्ञानाध्यासश्च सम्प्रोक्तः ॥ २० ॥ आत्मन्यनात्मवर्गस्योक्तोऽध्यासः स्वरूपतस्तस्य । संसर्गाध्यासः स्यान्नित्यमविद्याद्यनात्मनिवहे तु ॥ २१ ॥ अप्रत्यक्षाकाशे तलमलिनत्वादिकं च यद्बालाः । अध्यस्यन्ति परेऽव्यय एवमविद्याद्यनात्मकारोपः ॥२२॥ यस्याभावेऽध्यासो भवेन्न तस्मादनाद्यनिर्वाच्यम् । अध्यासोपादानं मन्यत इह भावरूपमज्ञानम् ॥ २३ ॥ एतमविद्याख्यं पुनरन्योन्याध्यासरूपमनुरुध्वा । लौकिकवैदिकमुख्यव्यवहाराः स्युर्न सन्तु तेऽथ यथा ॥ २४ ॥ खादिष्वहं वियुक्तस्येह नहि स्यात्प्रमातृताऽभावे । अस्याश्चैव प्रमाणप्रवृत्तिनिचयोपपत्तिरपि न स्यात् ॥ २५ ॥ इन्द्रियमनुपादाय व्यवहारो नापरोक्षमुख उदियात् । व्यापारोऽपिच खानां नेहाधिष्ठानमन्तरा सिध्येत् ॥२६॥ व्याप्रियते न च देहेनानध्यस्तात्मभावतः पुरुषः । न्यस्तेऽर्थेऽसति भविता नासङ्गस्यात्मनः प्रमातृत्वम् ॥ २७ ॥ उक्तान्येवमविद्यावद्विषयाण्यपि भवन्ति शास्त्राणि । प्रत्यक्षादिसमस्तप्रमाणवर्गाणि चेति तदवेहि ॥ २८ ॥ अविशेषाद्यत्पशुभिश्चार्थैः श्रोत्रादिकस्य संबन्धे । सत्यनुकूले ज्ञाने यान्त्यभिमुखमन्यथा निवर्तन्ते ॥ २९ ॥ संसारोऽयं सत्यः संलग्नः स्वात्मनीति विभ्रान्तिः । येयमविद्या नात्मन आभासस्यैव संसृतिस्त्वपितु ॥ ३० ॥ एतद्विविच्य वस्तुस्वरूपधारणमिहोदिता विद्या । आभासस्य हि सिद्धाः सप्तावस्था इमा निरुच्यन्ते[1] ॥ ३१ ॥ अज्ञानमेकमपराऽऽवैरणाह्वयाऽन्या भ्रान्तिः परोक्षविदितं त्वपरोक्षबोधः । अन्यः शुचाविलय एव परोऽतिहर्ष एता दशा 'भवत आसु हि बन्धमोक्षौ' ॥ ३२ ॥ पूर्वं स्मृता मनुजबन्धकृतस्तु तिस्र उक्ताश्चतस्र इह मुक्तिकृतश्च पश्चात् । टक्प्रागभावसहितं प्रवदन्ति मूलमज्ञानमेव नहि वेद्यहमित्यमुष्य ॥ ३३ ॥ गत्वाऽपथेन बहुधा विपरीतभावान्नह्यस्ति न स्फु-

१ निगद्यन्ते । पा० ॥ २ वृतिनामिका । पा० ॥

Digitized by Google

रति चेति यदाह तत्त्वम् । तद्व्याहृतं विदुरिहावृतिकार्यमार्या विक्षेपमेतमपि देहयुगानुबद्धम् ॥ ३४ ॥ आभासमेष नियतं खलु बन्धकोऽस्य कर्तृत्वमेव सुखदुःखनिबन्धनं च । ज्ञानद्वयेन लयमेष्यति सा क्रमेणासत्त्वावृतिः पुनरभानपदोदिता च ॥ ३५ ॥ नष्टेत्वभानमुख आवरणे स्वजीवत्वारोपनाशनवशाद्विलयं प्रयाति । कर्तृत्वमुख्यसमशोक इहैव संसाराख्यस्ततः परमुदेत्यतिहर्ष उक्तः ॥ ३६ ॥ यद्वत्त्वमेव दशमो भवसीति वाक्यात्स्वात्मन्युदेति धिषणा त्वपरोक्षनाम्नी । तद्वद्विविच्य शतशो विधृतेऽयमात्मा ब्रह्मेत्यथर्वणगिरोऽर्थं उपैति सिद्धिम् ॥ ३७ ॥ जाग्रत्काले संविदो गोचरा ये शब्दस्पर्शाद्यास्तथाऽऽकाशमुख्याः । भिद्यन्ते वैचित्र्यतोऽन्योन्यमेते संविन्मात्रं भिद्यते नैकरूप्यात् ॥ ३८ ॥ एवं स्वप्ने स्थायि[1] नो वस्तु वेद्यं जाग्रद्वेद्यं स्थाय्यतस्तद्विदाऽपि । संविद्भेदो न स्मृतः सैकरूपा सुप्तोत्थानं कुर्वतः पूरुषस्य ॥ ३९ ॥ यः सौषुप्ताज्ञानबोधः स्मृतिः स्यात्सेयं प्रोक्ताऽऽत्मानुभूतार्थरूपा । तस्माद्वेद्यं तत्तमश्चावबुद्धं सम्यक्काले स्वाप्यये बोध एषः ॥ ४० ॥ अर्थाद्भिन्नो नैव बोधात्कथञ्चित्स्वप्नज्ञानं वा[2] तदेवं भवेत्सा । संवित्तिस्थानेऽपि च स्वप्नभैका काले कस्मिंश्चिन्न हानिर्न वृद्धिः ॥ ४१ ॥ सेयं संवित्परमानन्द आत्मा परप्रेमास्पदमित्युच्यते यत् । अहं मा भूवं न भूयासमेवं प्रेमाऽऽत्मन्युद्वीक्ष्यते सार्व एषः ॥ ४२ ॥ तत्प्रेमात्मार्थं भवेत्स्वातिरिक्ते नान्यार्थं तद्भविता स्वात्मनीदम् । तस्मात्तत्स्यात्परमं तेन नित्यात्मन उक्तैवं परमानन्दताऽस्य ॥ ४३ ॥ अनुगतं समवस्तुषु यत्परं निरपवादमिदं सदवेहि तत् । अधिगते सति तत्पद उच्चकैस्त्यज मृषाजगदस्तिपदाश्रितम् ॥ ४४ ॥ तदनुशिष्टमहंपदलक्षितं स्वयमहं तदिति त्ववधारय । सदधिरोपितवस्तु तदात्मना विलयमेति मरौ दर्कधीर्यथा[3] ॥ ४५ ॥ यदिह चित्तमुखेन्द्रियसन्ततिव्यवहृताबुदितं परकारणम् । निरुपधीतिवचोऽतिगमाश्रयं तदवधारय निर्भयमौ

---

१ स्थिरम् ॥ २ इव ॥ ३ जलभ्रान्तिः ॥

Digitized by Google

स्वयम् ॥ ४६ ॥ वियदिवाधिकपूर्णमशेषहृत्स्थितमनन्तमनामय-मद्वयम् । यदुपदिष्टमिव श्रुतिमस्तकैस्तदव०,, ॥ ४७ ॥ यदनुभाति महोनिकुरंबकं रविशशिप्रमुखं यदलेपकं । वशकुशाग्रमनोविदि-तात्मकं तदव०,, ॥४८॥ यत इदं निखिलं मतमंशुवत्पट इवाभरणं कनकादिके । यदनुविद्धजडं स्फुरतीव च तदव०,, ॥ ४९ ॥ इति धृता मतिरप्यचलेऽव्यये निरभिमानबलेन विधूय च । सदसदा-शयजालमियाह्वयं कतकधूलिरिवांबुनि खात्मना ॥ ५० ॥ धृति-मिमां न गुरोः करुणां विना क्वचिदुपैति पुमानपि कश्चन । चिदुपसत्तिवशादुदयत्यसाविति विभुं हृदयेशमनुव्रजेत् ॥ ५१ ॥ अपि दविष्ठमिहेशकृपालवः सपदि नेदीयति स्वैचिदास्थितम् । यदि कृपाऽस्य भवेन्नहि दुर्लभं क्वचन किञ्चन सोंतदुपास्यताम् ॥ ५२ ॥ प्रणवरूपपरात्मविभावनादज हृयात्स्ववशंवदतां लघु । विभुनमस्क्रियया सहजा भवेदिति पतञ्जलिराह न तन्मृषा॥५३॥ हरिः ॥ शिशुसमाख्यमुनीन्द्रपदाम्बुजस्रुतमरन्दझरीपवित्राङ्कुरा । असितकण्ठपदाङ्कितनिर्मिताऽमृतलता जयताद्विधुपादगा ॥ ५४ ॥ ओं तत्सत् ॥ शान्तिः ॥

इत्यमृत(कल्प)लता समाप्ता ॥

कालीपञ्चकम्

हरिः । ॐ ॥ श्रुत्वामातृर्निलीनाः सुरमुनिवचनात्स्वावमानं च सम्यक्कुप्यत्कालाग्निरुद्रात्मकहरनिटिलाक्ष्युत्थिता भैरवी या । ब्रह्माण्डव्याप्तदेहा भिदुरकरसहस्राधिका घोररूपा कण्ठेकाली सदा सा वितरतु करुणार्द्रान्तरात्मा शिवं मे ॥ १ ॥ लब्ध्वा-ऽऽजाज्ञां करीतुं दनुजकुलपतिं दारुकं वाहनार्थं वेताल्यै संप्रतिज्ञाय च रुधिरमयीं शीधुमेनां प्रगृह्य । सार्धं षण्मातृभिर्या हतकरिपुपुरं द्रागवाप क्षिभीमा कण्ठेकाली० ॥ २ ॥ युद्धे या ब्रह्मदण्डं विसृ-

---

१ तेजःसमूहः ॥ २ ब्रह्मस्वरूपेण ॥ ३ समीपस्थं करोति ॥ ४ स्वरूपा-वस्थानमिति भावः ॥

Digitized by Google

जति दनुजाधीश्वरे दारुकाख्ये ब्रह्माणी ब्रह्मणोऽर्थ्योऽस्त्विति समरतलात्सन्निवर्त्य स्वमास्या । याचित्वाऽऽप्यास्य पत्न्या मनुयुगममुना दण्डतस्तत्प्रयोक्त्री कण्ठेकाली० ॥ ३ ॥ भीत्या पातालभीतासुरवरपथमाकाशवाचाऽवबुध्वा सिष्णासू रक्तपूरे भुवनमपि रविं जिह्वया कैशिकैश्च । या स्थित्वाऽऽच्छाद्य रात्रीत्युपरि गतममुं प्राक्षिपद्योन्नि वाण्या कण्ठेकाली० ॥ ४ ॥ शूलाग्रेकृत्य खात्प्रास्य च भुवि तरसाऽऽविध्य तद्वत्समुच्चै रक्ताक्ताङ्गाऽभवद्यापुरदमयितुरात्मोद्भवाऽभीतिदात्री यामस्तौष्टेन्द्रमुख्यस्त्विह जनकगिरोऽस्मान्सुखं पाति येत्थं कण्ठेकाली० ॥ ५ ॥ पञ्चकं भद्रकाल्या यः पठेदिदमनुत्तमम् । नैलकण्ठं तस्य भयं न भवेत्कचिदत्र च ॥ ६ ॥

इति स्तुतिमुक्तालतान्तर्गतं कालीपञ्चकं समाप्तम् ॥

हरिः । यमवाप्य समागमैकमुष्टिन्धयमद्वैतधुरंधरं दुरापम् । नवजेज्जनयित्र्यवर्त्म कश्चिच्छिशुनामाऽवतु मां स पूज्यपादः ॥ १ ॥ य इळाङ्गणजाङ्घिकान्तवासिप्रभृतीनां कलिकालिकं भयं घ्नन् । प्रणियच्छति सत्यबुद्धिमेकः शिशु० ॥ २ ॥ करुणावरुणालयं यमाहुर्गुटिकासिद्धिमुखस्य चैकवस्त्यम् । अपि चिद्युसदं गिरीन्द्रसंस्थं शिशु० ॥ ३ ॥ इह पक्ष्मिमया तपस्यथैकः करसंस्थामलकीफलाविभेदम् । उपदेक्ष्यति यः परात्मनिष्ठां शिशु० ॥ ४ ॥ निशि चात्तभवत्युपारतेऽन्तर्दृशि यस्मिन्निजकुण्डिकापहारी । न पदं चलितुं स्वयं शशाक शिशु० ॥ ५ ॥ किमिदं बहुभूतिकस्य वाग्रे नहि शंशक्ष्यत एव कश्चनेति । विपरीततया प्रवर्तितुं च शिशु० ॥ ६ ॥ सहजामृतधारयाऽभिवृष्टं यमिनां यो विदधाति चित्तवप्रम् । निजबोधसमाख्यबीजवाप्यं शिशु० ॥ ७ ॥ शिशुसंज्ञमुनीन्द्रसप्तरत्नं तदतीताङ्घ्रिसरोजषट्पदेन । असितादिककन्धरेण भक्त्या रचितं यः पठतीह मुच्यतेऽसौ ॥ ८ ॥ इति श्रीमदाराध्यपादसप्तकंस०

Digitized by Google

ओम् । अङ्गादङ्गात्संभवसीति श्रुतिवाक्यान्मन्ये शंभोरङ्गभवं यं शिवमेव । रक्षार्थं नः स्वीकृतदिव्यामलरूपं घण्टाकर्णं तं हृद्यान्तर्विमृशामि ॥ १ ॥ जाते यस्मिन्कालिमसूरी शममेति स्मारं घोरं नीरुजमाद्यं रविभासम् । सेवित्वा यं ना सुखमीयादतिमात्रं घण्टा० ॥ २ ॥ त्रैलोक्यं यद्भ्रूवशवर्ति प्रणिधियों भर्गस्यान्तर्ज्योतिरुदारः करुणाब्धिः । योगैः शून्ये यः परिदृष्टः सहजातो घण्टा० ॥ ३ ॥ यद्भक्तानां नैव वसन्तामयपीडा नृणां लोके शोकविनाशस्त्वपि यस्मात् । चञ्चूर्यन्ते यं परितोजं मुनयोऽपि घण्टा० ॥ ४ ॥ यद्भूत्रात्रायत्तमिहत्याद्वयवित्तिर्यं नामं नामं नाऽसम्मितमयते शम् । यस्मिन्रक्षा नो निहिता शंकररूपे घण्टा० ॥ ५ ॥ अर्भो ख्यमुनिभृत्यश्रीकण्ठेकालाभिधोदितम् । पञ्चकं यः पठेदेतन्नेह तस्य भयंभवेत् ॥ ६ ॥ इति घण्टाकर्णपञ्चकं समाप्तम् ॥

इति श्रीनीलकण्ठगुरुकृता योगामृततरङ्गिणी समाप्ता ॥

Digitized by Google

Widener Library
3 2044 092 844 588

Digitized by Google